मीमांसार्थप्रकाश of लौगाक्षिभट्ट केशव – Edited with Indices, Appendix and Notes by S.P.V. रंगनाथस्वामी आर्यवरगुरु – slightly pinholes not affecting reading matter. (Grantha Pradarśini New Series No 2), Vizagapatam, 1913.

(9)

Bill No. 5/07-08

100

2008-0559

A special te... y Bhatia, wa... estigate the... earnt that on... members, San... ng Malviya N... Maruti car.

A trap was... and the car w... 9.30 pm. The... the driver to st... tried to flee. T... ever, able to fo... and overpower... Sandeep, sa...

us fo...

mistic note. K... year-old Hera... with her mother and husband, said: "We will surely come whenever the bus starts again. Such things keep happening off and on. Things will normalise again."

Burqa-clad 50-year-old Sabra Khatoon expressed her helpless-...

Times News Network

NEW DELHI: By bidding farewell to the Delhi-Lahore bus on Friday, cash-strapped Delhi Transport Corporation bid adieu to its most profit-making venture on the inter-state routes. The bus used to earn...

seeing the Lahore bus ope... at Ambedkar stadium bus te... said. DTC is already neck-... losses, which amount to ab... 850 crore. "The bus would ... plying on Dehradun and H... routes. Although we cannot...

Grantha Pradarsani

*NEW SERIES No. 2.*

# MÎMÂMSÂRTHAPRAKÂṢA

OF

**LAUGÂKSHI BHATTA KÊṢAVA,**

Indira Gandhi National Centre for the Arts

Grantha Pradarsani

*NEW SERIES No. 2.*

# MÎMÂMSÂRTHAPRAKÂṢA

OF

## LAUGÂKSHI BHATTA KÊṢAVA,

FOR THE FIRST TIME EDITED

BY

S. P. V. RANGANATHASVAMI ARYAVARAGURU,

*Grandson & Grateful Pupil of Mahamahopadhyaya*
*Sri Paravastu Venkata Rangacharya Aryavaraguru.*

Indira Gandhi National Centre for the Arts

Printed and Published at

THE ARSHA PRESS,

VIZAGAPATAM.

1913.

SANS
181.42
BHA

KALANIDHI
Rare Book Collection
ACC No.: R-559
Date: 26.3.08
IGNCA
Indira Gandhi National
Centre for the Arts

DATA ENTERED
Date 11/07/08

ग्रन्थप्रदर्शनी २.

# मीमांसार्थप्रकाशः

## लौगाक्षि-भट्टकेशव-विरचितः ।

महामहोपाध्याय श्रीपरवस्तु भगवद्वेंकटरंगनाथाचार्यार्यवरगुरुमौत्रेण,
तत्पादसेवासमधिगतविद्यावैशद्येन
वेङ्कटरङ्गनाथस्वामिना आर्यवरगुरुणा
सूचीटिप्पण्यादिविन्यासपूर्वकं संशोधितः ।

Indira Gandhi National

विशाखपट्टणे
आर्षमुद्राशालायां
संमुद्र्य प्रकटीकृतः ।

शालिवाहनशकः १८३५.

# EDITOR'S NOTE.

Innumerable works on Purva-Mimamsa have been hitherto published, but I am sorry to remark none of them satisfy the conditions required by an adequate edition. The *Sabarabhashya* with the sutras and *Sastradipika* have been published by the Asiatic Society of Bengal and in the Pandit respectively; but the absence of the necessary indexes in both the editions makes them next to useless. The *Jaiminiya-nyaya-mala* was published in the Anandasrama Series, but in it the sutras have been unnecessarily introduced and one of the indexes is superfluous. The other index to the slokas of the text is also of very little use. The index of quotations, if added, would have very much enhanced the value of the edition. The *Arthasangraha* was published together with English Translation in the Benares Sanskrit Series, but again we have to make the same complaint as with the first two works. The text of *Mimamsa-nyaya-prakasa* of Apadeva was published once in Telugu characters at Vizagapatam and again in Devanagari characters at Benares, but nowhere with a commentary. Similarly with other works on Purva-Mimamsa which had the fortune of having gone through the Press. The present edition of *Mimamsarthaprakasa* of Bhatta-kesava is brought forth not so much to add to the existing Mimamsaic literature as to show the requisites of an edition of Mimamsa work which passes current and becomes serviceable in the hands of Sanskrit students. The old and rotten custom of committing to memory all the works one has studied has given way to the modern methods of analytic study and almost all the Sastraic works in every branch of literature and science have been turned into books of reference. Editors in future, therefore, should note this carefully and supply each work they edit with the necessary auxiliaries to make it a good book of reference.

Dr. Oppert in 1880 published a Catalogue of the Arsha Library (at page 557 of the Lists of Sanskrit Manuscripts in Southern India, Vol. I., under the name of the Library of "Pandit[illegible] Venkata Rangacharya of Visakhapattanam) in which the present work is termed through a mistake, *Mimamsa-sastra-prakasa*. Such a work does not exist at all. And perhaps doubtful of the existence of such a work, Th. Aufrecht omitted it from his *Catalogus Catalogorum*. Nor does the

correct form *Mimamsartha-prakasa* find a place in it. It is therefore, clear that the work does not form part of any of the public or private Libraries included in it. The present edition of the work is, therefore, based on a single manuscript belonging to my library. As there was no second copy to collate, I ventured to make some corrections on my own authority where the text was too corrupt, but in all such places, the reading of the original has been invariably added. Other and apter corrections will be thankfully received and inserted should the work have the fortune of a second edition.

It is intended to publish rare and ancient works through the Grantha Pradarsani, but I now realise that as the work becomes more and more rare and ancient, information regarding the author and his age becomes rarer still. At the end of *Mimamsarthaprakasa*, the colophon runs इति श्रीमन्महामहोपाध्याय-लौगाक्षि-भट्टकेशवतनूज-अनन्तभट्टसुत-भट्टकेशवविरचिते मीमांसार्थप्रकाशे द्वादशः परिच्छेदः ॥ from which it appears that the author belonged to the family of *Laugakshi*. Perhaps he was related to Laugakshi-Bhaskara, the author of *Tarkakaumudi* and *Arthasangraha*. Bhatta-kesava dedicates his work to Mahesa in the following sloka given at the end of his work.

वचनामृतधारयाऽनया ननु काशीमधिगम्य केशवः ।
कृतवानभिषेकमादरात् उमया शीतमयूखमालिनः ॥

Can we conclude from this that he was a native of Benares or simply that he visited Benares when he composed the work ?

The work is, as intended by the auther, a handbook of Mimamsa, for the use of beginners who are not in a position to consult the more advanced books on the subject. The author follows very closely शास्त्रदीपिका and सोमनाथीय in the preparation of his work and wherever the lines of the latter appeared to him te be tolerably easy, quotes verbatim from them. Being, as it is, an elementary work on Mimamsa, we should not expect him to be referred to by any other writer.

The word Mimamsa, literally means discussion. But it is usually restricted to reasoning which tries to settle points of doubt about the Viniyoga of the Vedic text in the performance of the sacrifice. There are some apparent inconsistancies between the Mantra and Brahmana portion of the Veda. A reconciliation between the two was affected at the outset by priestly tradition at the occasion of the sacrifice. As is always the case with oral tradition, there began to arise differences of opinion regarding the order etc. of certain sacrificial performances and the Brahmins tried to establish the doctrine of sacrificial performance on an

incontrovertable basis by using their free reasoning taking into account the circumstances and exegencies of the case. They thus composed treatises describing the different sacrificial performances which should entirely base themselves on the text of the Veda, and against which nobody appealing to the latter would be able to raise any objection. This impulse manifested itself in the Sutra period and Jaimini was the first to formulate such a science. This branch of science is therefore otherwise known as *Jaiminidarsana.* Thus, for instance, in the Rathakaradhikarana, the discussion turns upon the nature of the Rathakaras, whether they are Dvijas or not. It is laid in one portion of the Veda, where are specified the times at which the first three classes should sacrifice, it is enacted that the Rathakara should perform his sacrifice in the rainy season while it laid down in another portion of the Veda that the first three classes alone are authorised to perform sacrifice. Now, a reconciliation between these two statements if affected by the Mimamsaka by demonstrating that the Rathakaras are not Sudras but are midway between them and the Dvijas and they are, therefore, entitled to sacrifice. For a fuller discussion about the Rathakaradhikarana, the reader is referred to the appendix at the end of the work.

Now, the Mimamsa has been divided into different sections (said to be 1000 adhikaranas) dealing with as many subjects, every one of the sections having a specific name assigned to it, as *e. g.*, the Pasadhikarana, the Vyakaranadhikarana, etc. These sections, wherever they are referred to, either in works of Mimamsa or Vedanta or elsewhere, are designated as such. In old manuscripts, the names of these adhikaranas are written in the margin and not in the body of the text as is done in the printed editions. Editors, therefore, do not take much notice of these marginal headings and name the adhikaranas by their own names according to the subject of the section. But these are not the real names of the sections, for on page 14 of this work we have अस्य च नियमविधित्वं व्याकरणाधिकरणे स्वयं वार्तिककारैरेवोक्तम्, from which we learn that there is in Purva Mimamsa a section named *Vyakaranadhikarana*, but we do not meet with such an adhikarana in the printed works such as the *Sabarabhashya* or *Jaiminiyanyayamala*. In both these, the section is named साधुपदप्रयुक्त्यधिकरण and it is indexed under सा and not under व. In the *Subodhini* of Rameswarasuri a commentary on the aphorisms of Purva Mimamsa the same adhikarana is termed साधुपदप्रयोगनियमाधिकरण, which shows that even in these names the editors do not agree with each other. In the manuscript copies of *Sastradipika* and *Sabarabhashya*, belonging

to my library the section is named Vyakaranádhikarana in the margin. In naming the sections in Mimamsa works, therefore, the specific names by which they are referred to in other portions of the same work and in other works, should alone be noted, so that the sections may easily be recognised. In the present work, I avoided all these artificial names and given only the number of Adhyaya, pada and adhikarana, as it was not possible for me to get the correct names of all the adhikaranas, my manuscripts being only fragments of *Sabarabhashya* and *Sastradipika*.

Indira Gandhi National Centre for the Arts

# भूमिका ।

वन्दे श्रीपरवस्तुश्रीवासगुरोः पदाश्रितं तनयम् ।
वेङ्कटरङ्गगुरुं रामानुजमुनिदयोल्लसितबोधम् ॥ * ॥

'पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च ।
कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥'

इति हि प्रायो व्यवह्रियमाणः प्राचीनाभाणकः ॥

एषु षट्सु दर्शनेषु जैमिनिप्रोक्तं दर्शनं वेदाख्याक्षरराशेः पूर्वभागरूपस्य कर्मकाण्डस्य विचाररूपं शास्त्रम् । अत एवास्य कर्ममीमांसेत्यपि व्यवहारः ॥ व्यासप्रोक्तं वेदोत्तरभागरूपस्य ब्रह्मकाण्डस्य विचाररूपं दर्शनं तु ब्रह्ममीमांसेति व्यवह्रियते । अस्यैव प्राचीनं नाम भिक्षुसूत्रमिति । तथा च पाणिनिः—'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४।३।११०) इति । एवं भिन्नकर्तृकयोरनयोः भिन्नदर्शनत्वमेव प्रथममभूत् ॥

अनन्तरं बोधायनादिभिः सविशेषवादिभिः द्वयोरैकशास्त्र्यं समर्थितम् । तदा प्रभृति पूर्वमीमांसा, उत्तरमीमांसेति च व्यवहारः सञ्जातः । अत एव सायणाचार्यैः—'ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात्' इत्युक्तम् ॥

शङ्कराचार्यादिभिरैकशास्त्र्यस्यानङ्गीकृतत्वात् इदानीमपि लोके जैमिनिदर्शनस्यैव मीमांसेति व्यवहारः ; व्यासदर्शनस्य तु वेदान्तशास्त्रम्, शारीरकम् इति व्यवहारश्च सुप्रसिद्धः ॥

पूर्वमीमांसाशास्त्रे च जैमिनिप्रोक्तं सूत्रम्, शबरस्वामिविरचितं भाष्यम्, कुमारिलभट्टकृतं वार्तिकमिति च सम्भूय सम्पूर्णं प्रस्थानम् भाट्टमताभिख्यम् । प्राभाकर-मुरारिमिश्रयोः निबन्धैः सह सूत्रभाष्ययोः प्राभाकरमतत्वेन मुरारिमतत्वेन च व्यवहारः । भाट्टप्राभाकरयोः गुरुशिष्ययोरेककालिकत्वात् नवीनतया मुरारिणा अन्यथा व्याख्यातत्वाच्च लोके 'मुरारेस्तृतीयः पन्थाः' इति व्यवहारः प्रसिद्धः ॥

एवं भाट्ट-प्रभाकर-मुरारिमिश्रैः ईषद्भेदभिन्नतया व्याख्यातमपि जैमिनिदर्शनं मीमांसादर्शनमित्येव सामान्यतो व्यवह्रियते ॥

एतस्मिन्मीमांसाशास्त्रे पार्थसारथिमिश्र-खण्डदेव-माधवाचार्यप्रभृतिभिः विद्वद्भिरनेके महानिबन्धा विरचिताः । वेदान्ताचार्य-शङ्करभट्ट-आपदेव-अप्पयदीक्षितप्रभृतिभिः पण्डितैः वादग्रन्थाः खण्डग्रन्थाश्च विरचिताः । एषु अनेके काशी-काञ्चीप्रभृतिप्रदेशेषु मुद्रिताः प्रचलिताश्च ॥

एतादृशे महाशास्त्रे बालकानां प्रथमप्रवेशार्थं ये पठनपाठनेऽद्योपयुज्यन्ते——मीमांसापरिभाषा, अर्थसङ्ग्रहः, मीमांसान्यायप्रकाशश्चेति तैः सम्पूर्णस्य शास्त्रस्य विषयवैशद्यं न जायते । तेषु विधिवादमात्रस्यैव विपुलतया निर्णीतत्वात् ॥ जैमिनीयन्यायमाला माधवीया तु सर्वाङ्गसुन्दराऽपि महत्त्वाद्बालकानां प्रथमपठनाय नार्हा ॥

अतस्तादृशस्य लघुनिबन्धनस्य प्रकाशनाय यतमाने मयि अस्मदीये आर्षपुस्तकालये श्रीमद्भिः पितामहचरणैः सम्पादिते ग्रन्थसङ्घाते एष मीमांसार्थप्रकाशः मम दृष्टिपथमवातरत् । लाघवेन द्वादशाध्यायीप्रमेयस्य अत्र निरूपणात् प्रत्यन्तरालाभेऽपि मुद्रणाय साहसमकरवम् । यद्यपि एकमातृकाधारेणैव मुद्रणात् ग्रन्थपातादिदोषाः सम्भाव्येरन्, तथापि द्वितीयादिमुद्रणे पुस्तकान्तरसम्पादनेन तादृशो लोप अपनेय इति ममाशयः ॥

इतः परं मीमांसां पिपठिषवः 1 मीमांसापरिभाषा 2 मीमांसार्थसङ्ग्रहः 3 मीमांसार्थप्रकाशः 4 मीमांसाबालप्रकाशः 5 जैमिनीयन्यायमालेति क्रमेण प्रथमं पठित्वा तदुपरि शास्त्रदीपकादीन् पठितुमुद्युञ्जते चेत्साध्विति मन्ये ॥

मीमांसाग्रन्थानामनेकस्थलेषु मुद्रितान्नामपि सूच्यादिविन्यासः समीचीनतया न निवेशितः । लघोरप्यस्य ग्रन्थस्यान्ते या या सूच्यः मीमांसाग्रन्थानामावश्यकतया मम प्रत्यभान् ताः सर्वा निवेशिता मार्गप्रदर्शनायेति शुभम् ॥

# प्रमेयसूची।

—o—


प्रथमः परिच्छेदः पृष्ठसंख्या.

प्रमाणनिरूपणम् .... .... १—७

द्वितीयः परिच्छेदः

भेदनिरूपणम् .... .... ७—२२

तृतीयः परिच्छेदः

शेषलक्षणम् .... .... २२—२९

चतुर्थः परिच्छेदः

क्रत्वर्थपुरुषार्थयोर्लक्षणम् .... २९—३२

पंचमः परिच्छेदः

क्रमलक्षणम् .... .... ३२—३४

षष्ठः परिच्छेदः

अधिकारलक्षणम् .... .... ३४—३७

सप्तमः परिच्छेदः

अतिदेशलक्षणम् .... .... ३७—३८

अष्टमः परिच्छेदः

अतिदेशविशेषनिरूपणम् .... ३८—४०

नवमः परिच्छेदः

ऊहनिरूपणम् .... .... ४०—४५

दशमः परिच्छेदः

बाधनिरूपणम् .... .... ४५—४७

एकादशः परिच्छेदः

तन्त्रनिरूपणम् .... .... ४७—४८

द्वादशः परिच्छेदः

प्रसङ्गनिरूपणम् .... .... ४८—४९

श्रीमते हयग्रीवाय नमः ।

नमः परमर्षिभ्यः ।

भट्टकेशवप्रणीतः

# मीमांसार्थप्रकाशः ॥

प्रथमः परिच्छेदः ।

चराचरमिदं जगद्यदुदरैकदेशस्थितं
शिरस्त्रिदिवमम्बरं जलधिरम्बरं यद्वपुः ।
शशिद्युमणिलोचना हुतभुगानना दिक्छ्रुतिः
परात्परतरा हृदि स्फुरतु कापि मूर्तिर्मम ॥ १ ॥
याजुषाम्नायविज्ञेन लौगाक्षिकुलजन्मना ।
भट्टश्रीकेशवेनासौ मीमांसार्थः प्रकाश्यते ॥ २ ॥

१ अ० १ पा० १ अधि०

अथातो धर्मजिज्ञासा ॥

ननु धर्मविचारशास्त्रं नारम्भणीयम्; न हि 'स्वाध्यायोऽध्येतव्यः' इत्यर्थज्ञानायाध्ययनस्य विधिः, वेदाध्ययनेऽर्थज्ञानहेतुत्वस्य लोकसिद्धत्वात्; किं तु स्वर्गायाक्षरग्रहणमात्रं विधेयम्; एवं च विचारमन्तरेणापि शास्त्रार्थस्य समाप्तत्वादध्ययनानन्तरमेव गुरुगृहात्समावर्तितव्यम्; एवं च सति 'वेदमधीत्य स्नायात्' इति शास्त्रमनुगृहीतं भवति; त्वत्पक्षे त्वधीतेऽपि वेदे धर्मविचाराय गुरुकुलाधिवास एव कर्तव्यस्तथा च तन्नैरन्तर्यं बाध्येतेति चेत् अत्रोच्यते । यथा दर्शपूर्णमासजन्यं परमापूर्वमवघातजन्यस्यावान्तरापूर्वस्य कल्पकम् एवमशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्या-

पूर्वस्य कल्पकं भविष्यति । अन्यथा श्रूयमाणविध्यानर्थक्यापत्तिः । न च विश्वजिन्न्यायेन स्वर्गार्थत्वम् । दृष्टफलेऽर्थज्ञाने सम्भवत्यदृष्टस्य कल्पयितुमशक्यत्वात् । यदाहुः—

'लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना ।
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति ॥'

पौर्वापर्यविशिष्टसमानकर्तृकत्वं क्त्वावाच्यमिति स्मृतिबाधोऽपि न भवतीति सर्वं सुस्थम् ॥ न च विचारमन्तराऽध्ययनमात्राद्धर्मज्ञानं भवतीति धर्मविचारशास्त्रमवश्यमारम्भणीयमिति दिक् ॥

१ अ० १ पा० २ अधि०

## चोदनालक्षणोऽर्थो धर्मः ॥

अर्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ घटादौ चातिव्याप्तिः तद्व्यवच्छेदाय चोदनालक्षण इत्युक्तम् । तावत्येवोक्ते विधिगम्ये नरकफलकत्वेनानर्थस्वरूपे श्येनाद्यभिचारकर्मण्यतिव्याप्तिस्तद्व्यवच्छेदायार्थ इत्युक्तम् । यद्यपि श्येनस्य शत्रुवधः फलम् न तु नरकम्* । तथाऽपि तस्य वधस्य नरकहेतुत्वात् वधद्वारा श्येनोऽनर्थः ॥ न चैवमग्नीषोमीयपशुहिंसाया अपि वधत्वेन नरकहेतुत्वं स्यादिति वाच्यम् । तस्याः क्रत्वङ्गत्वेन क्रतुफलस्वर्गव्यतिरेकेण फलाभावात् ॥

चोदनाशब्दोऽत्र विधिमन्त्रनामधेयनिषेधार्थवादोपेतमहावाक्यरूपवेदपरः न तु विधिमात्रपरः । मन्त्रादीनां धर्मपरत्वानापत्तेः ॥

१ अ० २ पा० १ अधि०

नन्वर्थवादा न धर्मे प्रमाणम्, तन्निरपेक्षैव विधिना प्रवर्तकज्ञानसम्पादनात्; 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्याद्यर्थवादा अपि 'वायव्यं श्वेतमालभेत भूतिकामः' इत्यादिविधिमनपेक्षमाणाः भूतार्थमन्वाचक्षते, न त्वनुष्ठेयं किंचित्प्रतीयत

* नरकः पुंसि निरये देवारातिप्रभेदयोरिति मेदिनी । उदयनाचार्यास्तु न च नरकाण्येव न सन्तीति क्लीबं प्रयुञ्जते । तत्र मूलं मृग्यमिति मनोरमा ॥ उणादि० ५।३५.

इति प्राप्ते ब्रूमः । विधिवाक्यं तावत्पुरुषं प्रेरयितुं विधेयार्थस्य प्राशस्त्यमपेक्षते । अर्थवादवाक्यं च फलवदर्थावबोधपर्यवसिताध्ययनविधिपरिगृहीतत्वेन पुरुषार्थमपेक्षते । ततः पुरुषार्थपर्यवसितक्रतुविध्यपेक्षितप्राशस्त्यं लक्षणया समर्पयदर्थवादवाक्यं विधिवाक्येन सहैकवाक्यतामापद्यते । प्राशस्त्यं च गुणातिशयवत्त्वम् । बलवदनिष्टाननुबन्धित्वं तदित्यन्ये ॥

१ अ० २ पा० ४ अधि०

मन्त्रा अप्यनुष्ठेयार्थस्मारकत्वेन प्रमाणम् । न चैषामदृष्टार्थत्वमेव अर्थस्मरणस्य च प्रकारान्तरेण ब्राह्मणादिनाऽपि सम्भवादिति वाच्यम् । अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य सम्भवे केवलादृष्टस्य कल्पयितुमन्याय्यत्वात् । ब्राह्मणवाक्यादिनाऽर्थस्मरणसम्भवेऽपि मन्त्रैरेव स्मर्तव्यमिति नियमाङ्गीकारात् । तस्य च नियमस्यौत्सर्गिकत्वात् ॥ स्तोभमन्त्रेषु दृष्टार्थासम्भवाददृष्टं प्रयोजनमस्तु ॥

१ अ० ३ पा० १ अधि०

'अष्टकाः कर्तव्याः' इत्यादिस्मृतयोऽपि धर्मे प्रमाणम् । ननु मूलप्रमाणाभावान्न ताः प्रमाणम्, भावे वा स्मृतिवैयर्थ्यमिति चेन्न । विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् उपनयनाध्ययनादिस्मृतिवत् । न च वैयर्थ्यं शङ्कनीयम् । अस्मदादीनां प्रत्यक्षेषु परोक्षेषु वा नानावेदेषु विप्रकीर्णस्यानुष्ठेयार्थस्यैकत्र स्मृतिभिः संग्रथ्यमानत्वात् । तस्मादियं स्मृतिर्धर्मे प्रमाणम् ॥

१ अ० ३ पा० २ अधि०

ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये का चिदौदुम्बरी शाखा निखन्यते । तस्याश्च वाससा वेष्टनं स्मर्यते । 'औदुम्बरी सर्वा वेष्टयितव्या' इति । सेयं पूर्वन्यायेन प्रमाणं स्यादिति प्राप्ते ब्रूमः । 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिवचनेन स्पर्शो विधीयते । न च सर्ववेष्टने स्पर्शः सम्भवति । अतोमूलवेदानुमानं कालात्ययापदिष्टम् ॥ वार्तिककृतस्तु—"'तामूर्ध्वदशेन* वाससा परिवेष्टयन्ति' इति प्रत्यक्षश्रुतिमूलत्वेन वेष्टन-

* 'देशेन' इति मातृका ।

स्मृतेः श्रुतिबाध्योदाहरणत्वं न युक्तम्। एवं च तुल्यकक्षप्रमाणत्वेन विकल्प एव न्याय्यः। वस्तुतो विरोध एव नास्ति। 'औदुम्बरी [परि]वेष्टयितव्या' इत्येतावन्मात्रं सूत्रकृतोक्तं न सर्वेति। न च सर्वशब्दाभावेऽपि परिशब्देनापि सर्वशब्दार्थसम्पत्तेर्विरोध इति वाच्यम्। औदुम्बर्या ह्युत्तरे देशे पृष्ठेन तां स्पृशतोदङ्मुखेनोपविष्टेनोद्गात्रोद्गातव्यम्। तेन चौदुम्बरीमध्यस्योत्तरभागे द्वित्र्यङ्गुलमात्रं स्पृश्यते। तदनुरोधेन चोत्तरभागतो मध्ये द्वित्र्यङ्गुलं विमुच्येतरसर्ववेष्टनेऽपि परिशब्दार्थसम्पत्तेरविरोधात्" इत्याहुः॥

१ अ० ३ पा० ३ अधि०

ज्योतिष्टोमेऽग्नीषोमीयस्य पशोस्तन्त्रे प्रक्रान्ते वैसर्जनहोमो विहितः। तत्र यजमानं पत्नीं पुत्रान् [भ्रातॄन्] चाहतेन वाससा संछाद्य वाससोन्ते स्रुग्दण्डमुपनिबध्य जुहोति। तस्मिन् वासस्येवं स्मर्यते* । 'वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति' इति। सेयं स्मृतिरष्टकादिस्मृतिवन्मूलवेदानुमापने न प्रमाणमिति प्राप्ते ब्रूमः। दृष्टे सति नादृष्टार्थपरिकल्पना न्याय्या तदिह लोभमूलकत्वेनोपपत्तौ नादृष्टवेदमूलकत्वं कल्पनीयं गौरवादिति॥

१ अ० ३ पा० ४ अधि०

होलाकाद्याचारा अपि धर्मे प्रमाणं वैदिकशिष्टैः परिगृहीतत्वेनाष्टकादिवद्वेदमूलकत्वात्। होलाका वसन्तोत्सवः प्राच्येषु† प्रसिद्धः॥

१ अ० ३ पा० ५ अधि० वर्णकान्तरम्॥

दक्षिणदेशे मातुलकन्यां शिष्टाः परिणयन्ति। सोयमाचारो न प्रमाणम्।

'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्॥'

इति स्मृतिविरोधात्। न च स्मृत्याचारयोर्मूलवेदानुमापकत्वसाम्यात्समबल-

---

* 'श्रूयत' इति मातृका।

† होलाका प्राच्यदेशे प्रसिद्धेति शबरः, कुमारिलः, पार्थसारथिः, खण्डदेवः, माधवः, प्रकृतग्रन्थकर्ता केशवः, अन्ये च मीमांसका ऐकवाक्येन लिखन्ति। कोऽयं प्राच्यो देशः, स च सर्वैरप्येतैस्तथात्वेन व्यवहर्तुमर्हो नवेति न ज्ञायते॥

त्वमेवेति वाच्यम् । स्मृतिकल्पनद्वारा श्रुतिकल्पकानामाचाराणां व्यन्तरितप्रामाण्यानामेकान्तरितप्रामाण्यकस्मृत्यपेक्षया दुर्बलत्वात् ॥

१ अ० ४ पा० १ अधि०

'उद्भिदा यजेत । बलभिदा यजेत । विश्वजिता यजेत' इत्येवं समाम्नायते । तत्रोद्भिदादिपदं धर्मे प्रमाणं न वेति चिन्त्यते । किं तावत्प्राप्तम् । न धर्मे प्रमाणम् । कुतः । प्रमाणत्वेनाभिमतेषु [त्रिषु] वेदभागेष्वनन्तर्भावात् । तथाहि । विधिः साक्षात्प्रमाणम्, धर्मविधायकत्वात् । निषेधश्च धर्मविरोध्यनर्थनिवर्तकत्वेन । अर्थवादमन्त्रौ तु विध्यन्वयेन । तत्र न तावदुद्भिदादिपदं विधावन्तर्भवति । विध्यर्थभावनायाश्चांशेषु भाव्यकरणेतिकर्तव्यतारूपेषु कस्याप्यप्रतिपादनात् । नापि निषेधे । नञोऽसत्त्वेन प्रवर्तनाविरोधिनिवर्तनीया अप्रतिपादनात् । नाप्यर्थवादत्वम् । स्तुतेर्निन्दाया वाऽप्रतिपादनात् । नापि मन्त्रत्वम् । उत्तमपुरुषादीनां मन्त्रलिङ्गानामभावात् । तथाचोक्तम्—

'उत्तमामन्त्रणास्यन्तत्वान्तरूपाद्यभावतः ।
मन्त्रप्रसिद्ध्यभावाच्च मन्त्रतैषां न युज्यते ॥'

इति ॥ 'अग्नये जुष्टं निर्वपामि' इत्युत्तमपुरुषः । 'अग्ने यशस्विन्यशसेमर्पय' इत्यामन्त्रणम् । 'उर्वी चासि वस्वी चासि' इत्यस्यन्तं रूपम् । 'इषे त्वोर्जे त्वा' इति त्वान्तं रूपम् । तस्मादप्रमाणम्—इति [प्राप्ते] ब्रूमः । विध्यंशे करणेऽन्तर्भावान्नाप्रमाणम् । यद्यपि लिङ्पदेन सहोपात्तयजधात्वर्थ एव लिङर्थभावनायां करणम् । तथाप्युद्भिदादिपदं यजिनामत्वेन तत्रान्वेति । उद्भिन्नामकयागेन पशुं भावयेदिति यजिसामान्यस्य पशुभावनायां करणत्वाभावात् । तस्मात्प्रमाणम् ॥

१ अ० ४ पा० २ अधि०

अथ 'उद्भिदा यजेत पशुकाम' इत्यादयो 'दध्ना जुहोति' इतिवद्गुणविधय एव सन्तु, ज्योतिष्टोमानुवादेन खनित्रादिलक्षणगुणमात्रविधानात्; न तूद्भिदादिनामककर्मविधय इति चेन्न । उद्भिन्नामकेन यागेन पशुफलं कुर्यादिति सामानाधिकरण्येनान्वयसंभवे खनित्रेण साध्यो यो यागस्तेन तत्कुर्यादिति वैयधिकरण्येनान्वयस्वीकारस्यान्याय्यत्वात् । यदि च खनित्रव-

ता यागेनेति सामानाधिकरण्यं योज्यते तदा मत्वर्थलक्षणा स्यात्। 'दध्ना जुहोति। व्रीहिभिर्यजेत' इत्यादिषु द्रव्यविशेषे दध्यादिशब्दानामत्यन्तनिरूढ तया नामत्वासम्भवादगत्या दध्यादिगुणविधित्वम्। 'सोमेन यजेत' इत्यत्रापि सोमपदस्याप्रसिद्धयागनामधेयत्वकल्पनातो वरं प्रसिद्धार्थद्रव्यविशेषद्वारेण मत्वर्थलक्षणाश्रयणं सोमवता यागेनेष्टं भावयेदिति। उद्भिच्छब्दस्य तु लोकप्रसिद्धार्थाभावादुक्तरीत्या कर्मनामधेयत्वमेव ॥

कर्मनामधेयत्वं च निमित्तचतुष्टयादाश्रीयते ॥ क्वचिन्मत्वर्थलक्षणाभयात्। यथा—'उद्भिदा यजेत पशुकामः' इत्यत्र उद्भिच्छब्दस्य खनित्रादिगुणवाचकत्वे मत्वर्थलक्षणा। अन्यथा तस्य यागान्वयासम्भवः। तस्मादुद्भिच्छब्दो यागनामधेयम्। यदि च पशूद्देशेन यागस्तदुद्देशेन चोद्भिद्गुणो विधीयते तदा तु वाक्यभेदः ॥

१ अ० ४ पा० ३ अधि०

क्वचिद्वाक्यभेदभयात्। यथा—'चित्रया यजेत पशुकाम' इत्यत्र यागस्य दधिमध्वादिचित्रद्रव्यसम्बन्धे फलसम्बन्धे च विधीयमाने वाक्यभेद इति चित्राशब्दस्य यागनामधेयत्वम्। न चात्र मत्वर्थलक्षणया चित्रद्रव्यविशिष्टयागविधानमेवास्तु। तेन न वाक्यभेद इति वाच्यम्। 'दधि मधु पयो घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यनेन च द्रव्यस्य विहितत्वेन तदसम्भवात् ॥

१ अ० ४ पा० ४ अधि०

क्वचित्तत्प्रख्यशास्त्रात्। यथा—'अग्निहोत्रं जुहोति' इति। अत्राग्निरूपगुणप्रख्यापकशास्त्रान्तरसद्भावादग्निहोत्रशब्दस्य कर्मनामधेयत्वम्। न तु अग्नौ होत्रं यस्मिन्निति सप्तमीसमासं, अग्नये होत्रमस्मिन्निति चतुर्थीसमासं वाऽऽश्रित्याग्निरूपदेवताविधानम्। शास्त्रान्तरवैयर्थ्यापत्तेः। किं तच्छास्त्रान्तरमिति चेत्, 'अग्नये प्रजापतये च सायं जुहोति' इत्याद्यवेहि। तदुक्तम्—

'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवताया विधिस्तत्र दुर्बलं तु ततः परम् ॥' इति ॥

१ अ० ४ पा० ५ अधि०

क्वचित्तद्व्यपदेशात् । तत्सादृश्यादित्यर्थः । यथा—'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनशब्दस्य* कर्मनामधेयत्वम् । 'यथा श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इत्यनेन श्येनसादृश्येन यागस्यैव स्तुतत्वात् ॥

१ अ० ४ पा० ११ अधि०

उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेयत्वनिमित्तम् । यथा च 'वैश्वदेवेन यजेत' इत्यत्र वैश्वदेवशब्दस्य न विश्वदेवदेवतासमर्पकत्वम् ; 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इति उत्पत्तिवाक्येनैव देवताविशिष्टयागविधानात्, किं तु यागनामधेयत्वमिति केचित् । वस्तुतस्तु 'यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इत्यर्थवादरूपतत्प्रख्यशास्त्रादेव वैश्वदेवस्य कर्मनामधेयत्वम् । न तु निमित्तान्तरकल्पनं गौरवादिति तत्त्वम् ॥

इति भट्टकेशवविरचिते मीमांसार्थप्रकाशे प्रथमः परिच्छेदः ।

Indira Gandhi National Centre for the Arts

---

## द्वितीयः परिच्छेदः ।

२ अ० १ पा० १ अधि० द्वितीयवर्णकम् ।

**भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥**

इदं तु चिन्त्यते । द्रव्यादिभ्योऽपूर्वं त एव फलसाधनमाहोस्विद्धात्वर्थोऽपूर्वसाधनं स एव च फलसाधनम् । अत्र कश्चिदाह—द्रव्यादिभ्योऽपूर्वं त एव फलसाधनं, कुतः, फलं हि साध्यमानत्वात्सिद्धं साधनमिच्छति । द्रव्यादिकं च तथा । धात्वर्थश्च यागः स्वयं साध्यो न साधनम् । तस्माद्द्रव्याद्येव फलसाधनम् । अत्र ब्रूमः । फलमपि कारकम् । द्रव्याद्यपि कारकत्वात्तथा । न च कारकाणि मिथः संबध्यन्ते समत्वात् । किं तु क्रियया । सा चेह प्रत्ययवा-

* 'शब्देन' इति मातृका ।

च्या भावनैव। तेन तथैव फलं संबध्यते। तद्द्वारेण च करणस्यापि द्रव्यादेः फलेन संबन्धः। तस्यां च भावनायां धात्वर्थस्यैव करणत्वं युक्तं कल्पनालाघवात्। एवं च द्रव्यादेस्तन्निर्वृत्तिर्दृष्टमेव प्रयोजनं लभ्यते। अन्यथाऽदृष्टकल्पनाप्रसङ्गात्। किं च संनिकृष्टः प्रकृत्युपात्तो धात्वर्थः प्रत्ययवाच्यभावनया पदश्रुत्या सम्बध्यते। द्रव्यादि तु पदान्तरेणोपात्तं वाक्येन। 'श्रुतिश्च वाक्याद्बलीयसी' इति प्रसिद्धम्। साध्यरूपो हि धात्वर्थः स्वसाधनानिष्पादितः सन् शक्नोत्येव फलं साधयितुम्। तस्मात्स एव भावनायां करणम्॥

का पुनर्भावना। प्रयत्नो भावनेति केचिदाहुः। स्पन्द इत्यपरे। उभयसाधारणमुदासीनत्वविच्छेदसामान्यं भावनेत्यन्ये। पार्थसारथिमिश्रास्तु—न धात्वर्थातिरेकिणी भावना। धात्वार्थानामेव तु द्वे रूपे। एकमक्रियात्मकं सिद्धस्वभावम्। अपरं तु सर्वधात्वर्थानुयायि करोतिप्रत्ययवेद्यं क्रियात्मकं साध्यस्वभावमन्योत्पादानुकूलमाख्यातप्रत्ययाभिधेयम्। तदेव तु भावनास्वरूपम्। फलानुकूलो व्यापारो भावनेति तात्पर्यार्थः। स च यदवस्थो यागः स्वर्गं सम्पादयति तदवस्थो यागो येन व्यापारेण निष्पाद्यते स व्यापारः स्वर्गकृतिरित्येवं रूपेणाख्याताभिधेयो भवति। तत्र च यागः करणत्वेनान्वेति। स्वर्गः कर्मत्वेन। अग्न्यन्वाधानप्रयाजावघातादिर्व्यापारः प्रधानभावनाया एव प्रपञ्चः। धात्वर्थफलसाधनतासम्पादकव्यापारस्यैव भावनापदार्थत्वात्। न हि प्रयाजादिव्यापारं विना यागः फलं साधयितुमीष्टे। नचैवं यागोपि भावना स्यादिति चेत् कः संशयः। न त्वनिष्पादिते यागे फलम्। तथा च स्वस्यापि स्वफलसाधनतासम्पादकस्य भावनात्वे को विरोधः। एवं च प्रयत्नादेरपि भावनात्वम्। नियमपक्षान्तरं न स्वीकुर्मः॥

इदमत्राकूतम्। लिङादयोऽभिधां भावनां वाऽभिदधति। परं तु लिङ्त्वेनाद्याम्। आख्यातत्वेन द्वितीयाम्। तदुक्तम्—

'अभिधां भावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरा॥'

इति। अभिधां भावनां शब्दभावनां, प्रवर्तनामिति यावत्। अर्थात्मभावनाऽर्थभावना। तत्र प्रवृत्त्यनुकूलो व्यापारोऽभिधा, फलानुकूलो व्यापारो भा-

वनेति विवेकः । प्रवृत्त्यनुकूलव्यापारश्च वेदस्यापौरुषेयत्वाच्छब्दनिष्ठः पदार्थान्तरमित्येके ॥ वस्तुतस्तु पदज्ञानं पदगोचरः संस्कारो वांशत्रयविशिष्टभावना । प्रतिपादनं च सः । प्रवृत्त्यनुकूलव्यापारत्वेनानुगतीकृतानां सर्वेषामेव प्रवर्तनात्वात् । न त्वर्थान्तरं किं चित् ॥

अर्थभावनायास्तु प्रवर्तनायां विषयत्वेनान्वयः । भावनाप्रतिपादनरूपायां तस्यां भावनाविषयकत्वस्य स्पष्टत्वात् । अभिधाविषयीभूतार्थभावनायां चांशत्रयमपि साध्यसाधनेतिकर्तव्यतारूपमवश्यं प्रत्येतव्यम् । अन्यथा तदप्रतीतावर्थभावना अभिधाविषय इत्येतावन्मात्रप्रतीतावप्यप्रवृत्तेः । तस्यां चार्थभावनायां यागः करणत्वेनान्वेति । स्वर्गः फलं साध्यत्वेन । प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेन । न च भावनायां यागः कथं करणं ; प्रत्युत भावनासाध्यः सः, न तु तत्साध्या भावनेति वाच्यम् । यागस्य भावनासाध्यफलकरणत्वेन भावनायामपि करणत्वोपचारात् । सेयमर्थभावना 'स्वाध्यायोऽध्येतव्यः' इति वाक्येन विधीयते । तथा हि । अधीतेन स्वाध्यायेन यच्छक्यं समीहितं तद्भावयेदित्यवगते लिङादिना प्रवृत्तिं भावयेदित्यवगम्यते । प्रवृत्तिश्चार्थभावनैव ॥

प्रवृत्तिफलिकायां चाभिधायामपि साध्यसाधनेतिकर्तव्यतारूपमंशत्रयमपेक्षितम् । अन्यथा तस्याः स्वरूपतः फलतश्चाज्ञानादप्रवृत्तिप्रसङ्गात् । तत्र लिङादिविधिज्ञानं करणत्वेनान्वेति याग इव अर्थभावनायाम् । प्रवृत्तिरेव च साध्यत्वेन स्वर्ग इव अर्थभावनायाम् । अर्थवादादिजन्यं प्राशस्त्यज्ञानमितिकर्तव्यतात्वेन प्रयाजाद्यङ्गजातमिव अर्थभावनायाम् । तदुक्तम्—

'लिङाभिधा सैव च शाब्दभावना भाव्यं च तस्याः पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ॥'

इति । न च प्रयाजाद्यङ्गजातं विना यागात्फलानुत्पत्तेरर्थभावनायामितिकर्तव्यता, प्राशस्त्यज्ञानस्य तु कथमभिधायां तत्त्वमिति वाच्यम् । प्राशस्त्यज्ञानं हि इष्टसाधने कर्मणि इच्छावतोऽपि पुरुषस्य कष्टं कर्मेति व्याप्तेः कष्टतरे तत्र द्वेषः प्रवृत्तिं प्रतिबध्नातीति तन्निरसनद्वारा प्रवृत्तिं जनयतीति तस्याप्यभिधायां तत्त्वसम्भवात् ॥

तच्च प्राशस्त्यं सत्यर्थवादे तेनैव ज्ञाप्यते। असति तु विधिनैवाक्षिप्यते। स्तुत्यर्थवादे प्राशस्त्यं लक्ष्यम्। क्वचिच्छक्यं, यत्र तद्वाचकः शब्दः। *..........................। तत्राद्योऽर्थवादो विधिबोध्यप्रवर्तनायां द्वितीयस्तु निषेधवाक्यबोध्यनिवर्तनायामुपयुज्यते। निषेधवाक्यैः प्रवर्तनाविरोधिनिवर्तनाया एव प्रतिपादनात्॥

विधिस्तु चतुर्धा भिद्यते।

उत्पत्तिविधिनामैको यो द्वितीये विभाव्यते†।
विनियोगविधिस्त्वन्यस्तृतीयाध्यायगोचरः॥
चतुर्थादौ षष्ठवर्जं प्रयोगविधिचिन्तनम्।
अधिकारविधिर्नाम षष्ठाध्यायस्य गोचरः॥

तत्रोत्पत्तिपरो विधिरुत्पत्तिविधिः। उत्पत्तिः प्रथमं ज्ञानमिति तद्विदः। द्रव्यदेवतात्मककर्मस्वरूपं सेत्यपि केचित्। स यथा—'अग्निहोत्रं जुहोति। आग्नेयोऽष्टाकपालो भवति। सोमेन यजेत' इत्यादिः। न च विनिगमकाभावात् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्येव फलविशिष्टकर्मविधिरस्तु; 'सोमेन यजेत' इत्यादिस्तु गुणविधिरेव, न तु सोमविशिष्टकर्मविधिरिति वाच्यम्। यागस्वरूपनिर्वर्तकरूपं यत्र श्रूयते तस्य यावदुत्पत्तिविधित्वं तावन्नान्यस्येति सिद्धान्तात्। न चैवं 'दध्ना जुहोति' इत्यस्यापि गुणविशिष्टकर्मविधित्वापत्तिः रूपश्रवणादिति वाच्यम्। 'अग्निहोत्रं जुहोति' इत्यनेन कर्मणः प्राप्ततया पुनरत्र विशिष्टविधाने गौरवात्। मत्वर्थलक्षणापाताच्च। न चैवं 'सोमेन यजेत' इत्यत्रापि गौरवापत्त्या विशिष्टविधानं न स्यादिति वाच्यम्। उत्पत्तिवाक्यान्तर्भावेनानन्यगत्या तथाऽङ्गीकारात्। न च विशिष्टबोधकपदाभावान्न विशिष्टविधानमिति वाच्यम्। मत्वर्थलाक्षणिकस्य सोमपदस्य तादृशस्य सत्त्वात्। अन्यथेष्टोद्देशेन यागस्य तदुद्देशेन च सोमस्य विधाने वाक्यभेदापत्तेः। इत्थं च सोमवता यागेनेष्टं भावयेदिति वाक्यार्थः। उत्पत्तिविधौ सर्वत्र धात्वर्थस्य करणत्वेनैवान्व-

---

* निन्दार्थवादविषयको ग्रन्थः पतित इव भाति।

† 'विचार्यते' इति पाठान्तरम्।

यस्य सर्वसिद्धत्वादिति दिक् ॥

अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः। यथा— 'व्रीहिभिर्यजेत। दध्ना जुहोति' इत्यादिः। अत्र हि यद्यागेनापूर्वं कुर्वन्त्वा फलं भावयेत्तद्व्रीहिभिरेवेत्यर्थः। तेन यागकरणकापूर्वभावनायां करणतया विधीयमाना व्रीह्यादयो यागस्यापूर्वकरणत्वांशे हेतवो भवन्ति। कश्चित्तु—अत्र विधौ धात्वर्थस्य साध्यत्वेनान्वयमभ्युपेत्य व्रीहिभिर्यागं भावयेदिति वाक्यार्थ इत्याह। तत्तुच्छम्। सर्वत्र भावनाया विधेयत्वाद्धात्वर्थस्य करणत्वेनैवान्वयात्। किं च यागभावनाया निर्ज्ञातप्रकारत्वादपूर्वभावनायाश्चानिर्ज्ञातप्रकारत्वात्तत्र कथंभावाकाङ्क्षायां 'व्रीहिभिर्यजेत' इत्याद्यङ्गविधयः प्रवर्तमाना अपूर्वभावनायामेव प्रमाणम्। 'यत्परः शब्दः स शब्दार्थ' इति नियमात्। न च यागभावनायां भावाकाङ्क्षाऽस्ति। किं त्वपूर्वभावनायां भावाकाङ्क्षैव। तस्यां च सत्यां प्रवर्तमानं व्रीहिशास्त्रं यदि यागकर्मकभावनापरं तदाऽसङ्गताभिधानं स्यात्। न ह्याम्रान् पृष्टः कोविदारानाचष्ट इति सङ्गतम्। अत एव—

'भावनान्वयतः पश्चादंशयोरार्थिकोऽन्वयः।'

इति सप्तमाध्याये पार्थसारथिमिश्राः। तस्मादिदमत्रालोचनीयम्। 'स्वर्गकामो यजेत' इति प्रधानवाक्ये फलभावनैव विधेया। यागेन स्वर्गं भावयेदिति। नचापूर्वं विना कालान्तरभावि फलं यागः सम्पादयितुमीष्टे इत्यपूर्वभावनाप्याक्षेपलभ्या। सा चाङ्गविधौ तत्तदङ्गकरणकत्वेनैव विधेया। अत एव सर्वत्राङ्गविधौ क्रतूपकार एव भाव्य इति घण्टाघोषः॥ यत्तु फलभावनापूर्वभावनयोरविशेष इति प्रलपितं कस्य चित्। तन्न। एकत्र फलस्य भाव्यत्वमपरत्रापूर्वस्य भाव्यत्वमिति भेदात्। अत एवापूर्वं फलभावनान्तर्गतं न त्वपूर्वं कर्मभावनान्तर्गतम्॥ तथा च 'समिधो यजति' इत्यादावपि समिद्यागेनापूर्वं भावयेदिति वाक्यार्थः। अपूर्वमेव हि क्रतूपकार्य इत्युच्यते। एवं 'तनूनपातं यजति' इत्यादावपि तनूनपातयागेनापूर्वं भावयेदित्यर्थः। पूर्वत्र समिद्यागकरणकत्वेनापूर्वकर्मकभावना, परत्र च तनूनपातादिकरणकत्वेन भावना विधेयेत्येतावान् विशेषः। न च समिद्यागाख्यकरणावरुद्धायामपूर्वभावनायां कथं तनूनपातकरणान्तरान्वय इति वाच्यम्। 'सोमेन

क्रीणाति । गवा क्रीणाति' इत्यादिक्रयविधिसमानयोगक्षेमत्वादित्यास्तां विस्तरः । एतच्च—

'विधाने चानुवादे च यागः करणमिष्यते ।'

इति पक्षे उक्तम् । तथा चैतत्पक्षे व्रीह्यादिपदे मत्वर्थलक्षणाप्यावश्यकी ॥ केचित्तु व्रीहिभिर्यागं भावयेदिति वाक्यार्थः; अत एव करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतकरणत्वार्थाक्षिप्तसाध्यांशानुवादेन विधीयमानेऽपि गुणे न मत्वर्थलक्षणेति नामधेयचरणे वार्तिककृतः; इदं त्ववधेयम्, यत्र स्वरूपतो भावना विधेया तत्र धात्वर्थः करणत्वेनान्वेति, यत्र त्वर्थाक्षिप्तभावनानुवादेन गुणो विधीयते तत्र व्रीह्यादिकरणत्वेनैव सा विधीयते, न चैकस्यैवानूद्यमानत्वं व्रीह्यादिकरणत्वेन विधीयमानत्वमित्यविरोधात् (?); अत एव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र फलविधावपि 'आग्नेयोऽष्टाकपालो भवति' इत्युत्पत्तिवाक्यविहितयागकरणकभावनायां स्वर्गकरणकत्वमात्रमपूर्वं बोध्यते, न तु यागकरणकत्वमिति ॥

सर्वे च द्रव्यविधयो नियमफलतया नियमविधयः । कर्तृदेशकालगुणानामिव अर्थाक्षेपेणैव द्रव्यमात्रस्य लाभसम्भवात् । सति तु द्रव्यविधौ यागविधिर्न द्रव्यमाक्षिपति । प्रत्यक्षविधिनैवान्यथाऽनुपपत्तिनिरासात् । एवं चाक्षेपाभावे नियमः फलति । न तु नियमो विधीयते । तद्वाचकशब्दाभावात् । सति चैवं यागे व्रीहिनियमे यवव्यावृत्तिः फलतः । नन्वेवं यववाक्यस्याप्रामाण्यप्रसङ्गः; न चेष्टापत्तिः; तथा सत्यष्टदोष*कलङ्कितविकल्पापत्तेरिति चेन्न । अनन्यगत्या तस्याप्यङ्गीकारात् । व्रीहियवशास्त्रयोर्नियमार्थत्वेनान्यनिवृत्तिपर्यन्तत्वात्, व्रीहिशास्त्रप्रामाण्ये यवप्रयोगानुपपत्तेर्यवशास्त्रप्रामाण्ये च व्रीहिप्रयोगानुपपत्तेः, पाक्षिकाप्रामाण्यकल्पनं विना विकल्पस्यासम्भवात् । तदाहुः—

'तुल्यपक्षविकल्पोऽपि नाप्रामाण्येऽस्त्यकल्पिते' इति ॥

---

* अष्टौ च ते दोषा अस्मत्पितामहचरणैरेकस्मिन्श्लोके संगृहीताः—

'स्वान्यानुष्ठानवेलायां प्रामाण्यतदभावयोः ।
त्यागस्वीकारयोर्भेदे विकल्पस्याष्टदोषता' ॥ इति.

यदाहुर्न्यायविदोऽपि—'सर्वतो बलवती ह्यन्यथानुपपत्तिः' इति ॥ किं तद्दोषाष्टकम्, उच्यते—व्रीहिशास्त्रार्थानुष्ठानकाले तावद्यवशास्त्रे दोषद्वयमापतति । प्रतीतप्रामाण्यापह्नव एको दोषः । अप्रतीताप्रामाण्यकल्पनं च द्वितीयो दोषः । कल्पिताप्रामाण्यस्य च शास्त्रस्य पुनः प्रामाण्योपजीवनं विना तदर्थानुष्ठानकाले तस्मिन्नेव शास्त्रे अपरं दोषद्वयं कल्पिताप्रामाण्यत्यागो निराकृतप्रामाण्योपजीवनं चेति,

'एवमेकत्र चत्वारो दोषा वाक्ये प्रकीर्तिताः ।
एत एव प्रसज्येरन् द्वितीयेऽपि प्रकल्पिते ॥' इति ।

ननु मिश्रैरपि व्रीहियवैः यागानुष्ठानसम्भवादुभयानुग्रहो भविष्यतीति । मैवम् । 'समर्थः पदविधिः' इति पाणिनीयानुशासनात्पदमात्रविधेः समर्थत्वात् व्रीह्यादिप्रातिपदिकस्य च यागादिप्रातिपदिकसापेक्षत्वेन व्याघातापत्तेर्विभक्त्यर्थान्वयायोगाच्च निरपेक्षाणामेव व्रीहियवानां तृतीयया करणत्वप्रतीतेर्मिश्रत्वस्यायुक्तत्वात् । किं चादृष्टार्थत्वे सत्यज्ञातोपायपरिमाणत्वेन प्रधानस्योक्ताङ्गविधाने नैराकांक्ष्याप्रतीतेः समुच्चयः स्यात् । व्रीह्यादेस्तु प्रदेयहविःप्रकृतित्वेन दृष्टार्थत्वादेकाङ्गविधानेन नैराकांक्ष्यावगतेः समुच्चयो न युक्तः । तस्मादुभयार्थापरिग्रहवन्मिश्रणेऽप्युभयनाशापत्तिर्न तु कोऽपि शास्त्रार्थोऽनुगृहीतो भवति ॥

ननु परिसंख्याविधेरपि इतरनिवृत्तिफलकत्वात्तदपेक्षया नियमविधेः को भेद इति चेदयं भेदः । नियमविधौ तावदप्राप्त्यंशे प्राप्तिः फलम् । ततश्च सर्वदैव तस्य प्राप्तावितरनिवृत्तिरर्थतः सामर्थ्यात् । न हि तस्यां तस्य विधेयस्य नियमेन सम्बन्धे तेनैव कार्यसिद्धौ साधनान्तरमुपादातुमर्हति । तेन नियमशास्त्रस्य नियमफलकस्येतरनिवृत्तिफलकत्वम् । परिसंख्याविधेस्तु 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यादेरितरनिवृत्तिरेव फलम् । न हि मन्त्रस्याश्वाभिधान्यादानेऽनियतप्राप्तिरुभयत्रैव लिङ्गानुमितश्रुत्या रशनामादद्यादित्येवमात्मिकायाः प्राप्तेः । किं तु विशेषश्रुत्या प्रत्यक्षयानया लिङ्गेन सामान्यश्रुत्यनुमानाभावेन गर्दभाभिधानीतो मन्त्रस्य विनियोजकश्रुत्यभावान्निवृत्तिरित्येतावत् । तेन साक्षान्निवृत्तिफलको विधिः परिसंख्या,

परम्परया निवृत्तिफलको विधिर्नियमविधिः ।

'पञ्च पञ्चनखा भक्ष्याः' इत्यपि नियमविधिः । तथा हि । नात्र पञ्चनखा भक्षणसंस्कार्याः । कार्यानुपयोगित्वात् । न च भक्षणे विधिः सम्भवति । रागतः प्राप्ते विधिवैयर्थ्यापत्तेः । किं तु पञ्चनखकर्तृकं भक्षणमुद्दिश्य तत्र सक्तुन्यायेन विनियोगसङ्गं कृत्वा पञ्चभिः पञ्चनखैरित्युपायतया—

'शशकः शल्लकी गोधा खड्गः कूर्मश्च पञ्चमः ।'

इति वाक्यावगताः शशकादयो नियम्यन्ते । तत्रापि पञ्चत्वं गणनतः प्राप्तमनूद्यते । तेन शशकाद्यन्यतमेन भक्षणं कार्यमिति पुरुषार्थोऽयं नियमः । प्रतिग्रहादिना धनार्जननियमवत् । अस्य च नियमविधित्वं व्याकरणाधिकरणे स्वयं वार्तिककारैरेवोक्तम्—'नहीह परिसंख्या सम्भवति' इत्यादिना ॥

उत्कलमीमांसकास्तु द्विविधा परिसंख्या सदोषा निर्दोषा च ; तत्रान्त्या 'इमागृभ्णन् रशनामृतस्येत्यश्वाभिदानीमादत्ते' इति, आद्या 'पञ्च पञ्चनखा भक्ष्याः' इति भष्यानुसारेणाचक्षते । एतत्पक्षे पञ्चेतरे पञ्चनखा न भक्ष्या इत्येव वाक्यार्थः । दोषत्रयं चानन्यगत्या स्वीक्रियते । तद्यथा—स्वार्थहानं, प्रतिषेधार्थस्याश्रूयमाणस्य कल्पनं, प्रमाणान्तरप्राप्तबलवदनिष्टाननुबन्धीष्टसाधनत्वस्य च बाध इति ॥

व्रीहीनवहन्तीत्यत्रापि नियमविधिः । तथा हि । नेहापूर्वविधित्वं सम्भवति । अवघातस्य वैतुष्यसाधनताया लोकत एव प्राप्तत्वात् । न च व्रीहिस्वरूपसाधनताऽवघातस्य सम्भवति । निरुप्तेष्वेव व्रीहिष्ववघातात् । न च शक्यन्ते व्रीहयोऽवघातेन सम्पादयितुम् । तस्मान्नियमविधिरेवायम् । यस्मिन् पक्षे दलनादिकं वैतुष्यसाधनतया प्राप्तं नावघातस्तस्मिन् पक्षेऽवघातो विधीयते । न चैवमवघाते वैतुष्यसाधनत्वस्य लोकसिद्धत्वाद्धर्मत्वानुपपत्तिरिति वाच्यम् । नियमलक्षणसम्बन्धस्यालोकसिद्धत्वात् । लोकतो हि वैतुष्यार्थं कदाचिद्दलनं कदाचिन्नखनिकृन्तनं कदाचिदवघात इति प्राप्यते । न त्ववघातनियमः । न चैवं नियमादृष्टं कल्प्यं स्यात् । इष्टत्वात् । अन्यथा विधिवैयर्थ्यापत्तेः ॥ ननु नियमः कथमत्रावगम्यते । व्रीह्यवघातयोरुद्देश्यो-

पादेयभावादुद्देश्यवाचिना व्रीहिपदेन हि उपादेयसम्बन्धयोग्या यावन्तो व्रीहय उपस्थाप्यमाना उपादेयावघातसम्बद्धा अवहन्तीत्यनेन बोध्यन्ते इति यावदुद्देश्यसम्बन्ध एवोपादेयस्य तेन सह नियमः । अत एव व्रीहिपदेऽपूर्वसाधनत्वलक्षणा । सर्वेषु व्रीहिष्ववघातस्य बोधयितुमशक्यत्वात् । केषुचिद्दलनादिनाऽपि वैतुष्यसम्पादनात् । तत्सिद्धोऽयमाग्नेयापूर्वसाधनेषु व्रीहिषु यावत्सु सङ्कोचादुपस्थितेषु अवघातसम्बन्धः । इयं च व्रीहिष्वपूर्वसाधनता वेदैकगम्यत्वादपूर्वं नियतक्रियाधीनत्वाच्च नियमापूर्वाख्यां लभते । न हि सा साधनताऽवघातहीनेषु तिष्ठति । तथा सत्यवघातविधिवैयर्थ्यप्रसङ्गः । न चावहता व्रीहय एवापूर्वसाधनमिति बोधयितुमवघातविधिरिति वाच्यम् । तथाप्यवघातरहिते सा साधनता नास्तीति अतः अवघातजन्यैव सा । नन्ववघातोऽवच्छेदकं न हेतुः अवहतव्रीहित्वेनैवापूर्वजनकत्वात्, तथा चावघातवितुषीकृतव्रीहिसम्पादितपुरोडाशजन्याग्नेययागेन समीहितं भावयेदित्येव वाक्यार्थः पर्यवस्यति, न त्ववघातेनापूर्वसाधनतां भावयेदिति चेन्न । अवघातादीनामवच्छेदकत्वेऽपूर्वसाधनताबोधकविधिविरोधापत्तेः । तस्मादवघातेनापूर्वसाधनतां भावयेदित्येव वाक्यार्थः । व्रीहिपदं च व्रीहित्वैकार्थसमवाय्यपूर्वसाधनत्वं लक्षयति तच्च यवेष्वपीति तेष्वपि सिद्धोऽवघातः । न स्रुगादिषु । तेषां सत्यप्याग्नेयापूर्वसाधनत्वे व्रीहित्वैकार्थसमवाय्यपूर्वसाधनत्वाभावेन तद्गतापूर्वसाधनतयाः व्रीहिपदशक्यसम्बन्धाभावेनालक्ष्यत्वादिति ॥

केचित्त्वाहुः—‘स्वाध्यायोऽध्येतव्यः’ इत्यत्रेवावघातविधावपि लोकसिद्ध एव साध्यसाधनभावो विध्यर्थः, न ह्यध्ययनार्थज्ञानयोः साध्यसाधनभावोऽलौकिकः; किं तु लोकसिद्ध एव, नियमादृष्टाश्रयणाच्च न विध्यानर्थक्यम्; तद्वदिहापि प्रयोजनं नियमो न तु वाक्यार्थ इति । एतेनैव कर्तृदेशकालमन्त्रद्रव्यादिनियमापूर्वाण्यपि व्याख्यातानि । अन्यथा तत्रापि विध्यानर्थक्यापत्तेरिति ॥

ननु नास्त्येवापूर्वम्, न च कर्मणश्चिरध्वस्तत्वादपूर्वं विना कालान्तरभाविफलजनकत्वासम्भव इति वाच्यम्; धर्म्यन्तरकल्पनापेक्षया यागादि-

कर्मण एव फलपर्यन्तस्थायित्वकल्पनौचित्यात्, अस्तु वा यागध्वंसस्यैव व्यापारत्वम्, न च प्रतियोगितदभावयोरेकजनकत्वाभावः, अप्रयोजकत्वात्, महानसमहाह्रदौ वह्नितदभाववन्ताविति प्रत्यक्षे विषयत्वेन वह्नितदभावयोर्जनकत्वदर्शनाच्च; अस्तु वा देवताप्रीतिरेव व्यापारः, 'तृप्त एवैनमिन्द्रः प्रजया वर्धयति' इत्यादिश्रुतेः; इदं चाभ्युपेत्योक्तम्; वस्तुतस्तु चिरध्वस्तस्यैव यागस्यास्तु फलजनकत्वम्; ननु चिरध्वस्तस्य कारणत्वं व्यापारं विनाऽनुपपन्नमिति चेत्, किं तत्कारणत्वं यस्यानुपपत्तिः; कार्योत्पत्तिकाले विद्यमानत्वं तत्त्वमिति चेत् प्रतियोगिनः स्वध्वंसहेतुता न स्यात्, अपूर्वे कल्पितेऽपि तस्यासम्भवतादवस्थ्याच्च; कार्योत्पत्तिकालवर्तिव्यापारवत्त्वमिति चेत् व्यापार एवाव्याप्तिः व्यापारेऽपि व्यापारान्तरानुसरणेऽनवस्थापत्तेश्च; तस्मादनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं तच्च व्यापारं विना उपपन्नमेव, अनन्यथासिद्धत्वनियतपूर्ववर्तित्वयोश्चिरध्वस्तेऽप्यविच्छेदात् ॥ अत्र वदामः ॥ करणत्वमव्यवधानगर्भमेव। अन्यथा रासभस्यापि वह्निकारणत्वापत्तेः। अनादौ संसारे तद्देशे तत्समवधानसम्भवात्। अव्यवधानं च स्वस्वजन्यान्यतराव्यवधानमेवेति स्वयं व्यवहितस्य यागादेः स्वर्गं प्रत्यव्यवधाननिर्वाहकत्वेनापूर्वसिद्धेः। इदमेव च चिरध्वस्तस्य व्यापारवत्त्व एव कारणत्वमिति व्याप्तौ विपक्षबाधकम्। अत एव यागध्वंसोऽपि न व्यापारः। तथा सति रासभातिप्रसङ्गभयेन तदतिरिक्तव्यापारस्यैवाव्यवधाननिर्वाहकत्वात्। यच्चोक्तं देवताप्रीतिरेव व्यापारः, तदयुक्तम्, शब्दात्मिकायां तस्यां चेतनधर्मस्यासम्भवात्। क्षणिकेन यागेनापूर्वं विना देवताप्रीतेरप्युत्पादासम्भवाच्च। नापि यागस्यैव स्थिरत्वं। तदेव हि श्रुतार्थापत्त्या कल्प्यं यत्प्रमाणान्तरेण न विरुध्यते। प्रत्यक्षादिविरुद्धं च क्रियात्मकयागस्य चिरस्थायित्वम्। तत्सिद्धमपूर्वम् ॥ तत्रेदमालोचनीयम्। प्रथमं तावत्फलवाक्येन कर्मणः फलसाधनत्वं बोध्यते यागेन स्वर्गं कुर्यादिति, ततः कथं क्षणिकेन फलं कर्तव्यमित्यपेक्षायामपूर्वं कृत्वेत्युच्यते। ततः कथमपूर्वं तेन क्रियेत इत्यपेक्षायामनुष्ठानप्रकारेणेत्युच्यते। ततः पूर्वापरकालवर्तिभिरङ्गव्यापारैर्विषयीकृतस्य यागस्यापूर्वसाधनत्वं न स्वरूपेण सम्भवतीत्यपूर्वान्तरम्-

पि कल्प्यते ॥

दर्शपूर्णमासयोस्तु नवापूर्वी स्वीकर्तव्या । तथा हि—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्येन कर्मणः फलसाधनत्वं प्रत्याय्यते । तच्च व्यापारं विनाऽनुपपन्नमिति श्रुतार्थापत्त्याऽपूर्वं क्लृप्त्वेत्युच्यते । तादिदं परमापूर्वं पक्षद्वयवर्तिभ्यां समुदायाभ्यां व्यापारं विना नारब्धुं शक्यमिति समुदायद्वयजन्यमपूर्वद्वयं कल्प्यते । तत्कथंभावाकाङ्क्षायामग्न्यन्वाधानाद्यङ्गोपदेशः । ततः पूर्वोत्तराङ्गसहितेभ्यस्तदुत्पत्तिर्न स्वरूपेण सम्भवतीति प्रतित्रिकं त्रीणि त्रीण्यपूर्वाणि कल्प्यन्ते ॥

केचित्त्वेवमाहुः—प्रतित्रिकमपूर्वत्रिकम्, त्रिकद्वयेन चोत्तराङ्गसहकृतेन परमापूर्वनिष्पत्तिर्लाघवात्, न त्वपूर्वान्तरद्वयं गौरवादिति । ते त्वतिलघवः । समुदायापूर्वद्वयान्यथानुपपत्तिप्रसूतार्थापत्तिकल्प्यापूर्वषट्कस्योपजीव्यविरोधेन समुदायापूर्वद्वयानपवादकत्वात् । उत्पत्तिसमुदायफलापूर्वाणामुत्तरोत्तरार्थापत्त्या पूर्वपूर्वसिद्धिरित्यस्मत्सिद्धान्तात् ॥

किं चावश्यं समुदायद्वयादपूर्वद्वयम् 'अमावास्यायाममावास्यायां यजेत, पौर्णमास्यां पौर्णमास्यां यजेत' इति श्रवणात्; अमावास्यापौर्णमासीशब्दौ हि 'य एवं विद्वानमावास्यां यजते, य एवं विद्वान् पौर्णमासीं यजते' इति वाक्यद्वयानूदितानां समुदायापन्नानामाग्नेयैन्द्रदधियागेन्द्रपयोयागत्रिकस्याग्नेयोपांशुयाजाग्नीषोमीययागत्रिकस्य च क्रमेण बोधकाविति पौर्णमास्यधिकरणे स्थितम्; ततश्चामावस्ययेत्यनेन 'समर्थः पदविधिः' इति व्याकरणानुसारिणा शब्दान्तरानुसारिणा वोत्तरनिरपेक्षाणामाग्नेयादीनां त्रयाणां विधानात्तद्भाव्यं समुदायापूर्वं कल्प्यते; फलं फलापूर्वं वा प्रति तेषां पौर्णमासींसापेक्षाणामेव 'दर्शपूर्णमासाभ्यां यजेत' इत्यनेन करणत्वावगमादिति वार्तिकानुसारिणः ॥

'चतुर्होत्रां पौर्णमास्यामभिमृशेत्पंचहोत्राममावास्याम्' इत्यसाधारणाङ्गोपदेशात्तत्सिद्धिरिति भवदेवभट्टाः ॥

अथ समुदायापूर्वद्वारैव फलसिद्धेः कृतं परमापूर्वेण । भ्रान्तोऽसि । समुदायापूर्वद्वयं प्रत्येकसमुदायस्यैव व्यापारः । फलं च समुदितद्वयजन्यम् ।

अतः समुदितयोर्व्यापार एकः सिध्यति । तदेव परमापूर्वम् । तदाहुः—

'अर्थापत्तेरिहापूर्वं पूर्वमेकं प्रतीयते ।
ततस्तत्सिद्धये भूयः स्यादपूर्वान्तरप्रमा ॥' इति ।

अपरे त्वेवं समादधुः—दर्शपूर्णमासाभ्यामित्यत्र तु द्वित्वावच्छिन्ना करणता प्रतीयते; सैव वेदगम्यशक्तिरपूर्वमिति गीयते; सा च स्वरूपतो वाक्यगम्यापि पुरुषस्य फलयोग्यतारूपेणार्थापत्तिकल्पितशब्दगम्या; दर्शपूर्णमासाभ्यां यागाभ्यां स्वर्गं भावयेदपूर्वं कृत्वेत्येवं विधिशब्देन प्रतीयमानत्वात् ॥

कश्चित्कर्तुः फलसाधनता फलाव्यवहितपूर्ववृत्त्यैककार्यद्वारा कुविन्दस्येव तन्तुसंयोगद्वारा *ऊतिसाधनतेति व्याप्तेः परमापूर्वसिद्धिमाह ॥

ननु यागानां षट्त्वमनुपपन्नम्; समुदायद्वयपरं द्वित्वम्, न च तौ यागाविति कथं वाक्यार्थधीरिति चेत्सत्यम् । अत एव समुदायोपसर्जनसमुदायवचनावेतौ । समुदायात्मना षडपि द्वित्वयोगिन इति यावत् । यथा सेनावनादिशब्दा युद्धसाधनत्वमेकदेशावच्छिन्नत्वं च प्रवृत्तिनिमित्तीकृत्य हस्त्यश्वादिषु पनसाम्रकोविदारादिषु च प्रवर्तन्ते तथा दर्शपूर्णमासशब्दौ दर्शकालयोगित्वं पौर्णमासीकालयोगित्वं च पुरस्कृत्य त्रिके त्रिके प्रवर्तेते । तदेवं समुदायात्मना द्वाभ्यां यागक्रियाभ्यामपूर्वात्मना स्थिराभ्यां स्वर्गं भावयेदिति 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यस्य निष्कृष्टोऽर्थः । सापूर्वात्मना समुदायापूर्वद्वयसाध्या । अपूर्वद्वयं चारादुपकारकाङ्गोपाकृतोत्पत्त्यपूर्वत्रयत्रयसाध्यम् । तत्त्रयं च स्वस्वसामयिकाङ्गोपकृतप्रत्येकयागत्रयसाध्यमिति नवापूर्वी दर्शपूर्णमासयोः ॥

ननु धात्वर्थस्य भावनाविशेषणत्वाद्भवतु विधेयत्वम्; गुणद्रव्ययोस्तु कथं तत्; न च तयोस्तन्मास्त्विति वाच्यम्; अविहितस्यापूर्वासाधनत्वादिति चेन्न । धात्वर्थस्येव गुणद्रव्ययोरपि कारकात्मना भावनाविशेषणत्वात् । न हि धात्वर्थोऽपि स्वरूपेण भावनाविशेषणम् । तत्फलरूपत्वात् । किं तु करणकारकत्वेन । तच्च लाक्षणिकम् । गुणद्रव्ययोस्तु तच्छ्रौतम् । तदाहुः—

* 'वति' इति मातृका ।

'विधित्वं श्रौतमार्थं च भावनाकारकाश्रयम् ।
ताभ्यां तु व्यतिरिक्तेऽर्थे विधित्वं नोपलभ्यते ॥' इति ।

श्रौतं विधिशक्तिप्रतिपाद्यम् । तच्च भावनायाम् । आर्थम् अर्थापत्त्यवगतविधिवेद्यम् । विधित्वं विधेयत्वम् ॥

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव । न तु स्वतन्त्रः । प्रयोगप्राशुभावोऽनुष्ठीयमानपदार्थानामविलम्बापरपर्यायं साहित्यम् ॥

फलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यं क्रियाजन्यफलभोक्तृत्वम् । स च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिः ॥

२ अ० २ पा० १ अधि०

**शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥**

कर्मभेदः शब्दान्तरादिषट्प्रमाणकः ॥ तत्र शब्दान्तराद्यथा—'यजति ददाति जुहोति' इत्यादि । अत्र हि धातुभेदात्प्रतिधात्वर्थं भावनाभेदः । देवतोद्देश्यकहविस्त्यागो यागः । देवतोद्देश्यकाग्न्यधिकरणकहविःप्रक्षेपो होमः । ससम्प्रदानकस्त्यागो दानम् ॥

२ अ० २ पा० २ अधि०

क्वचिदभ्यासात् । यथा—'समिधो यजति, तनूनपातं यजति' इत्यादौ । पञ्चकृत्वो यजतिपदमभ्यस्तमिति प्रत्यभ्यासं भावनाभेदः ॥

२ अ० २ पा० ७ अधि०

क्वचित्संख्यातः । यथा—'तिस्र आहुतीर्जुहोति, द्वादश द्वादश जुहोति' इति श्रूयते । अत्र संख्याभेदश्रवणात्कर्मभेदः । न च यथा 'एकादश प्रयाजान् जुहोति' इत्यत्र संख्याश्रवणेऽप्यभ्यासेन तत्तत्करणात्कर्मैकत्वं तथेहाप्यभ्यासात्संख्यसम्पत्तिरस्तु न कर्मभेद इति वाच्यम् । प्रयाजानां निर्ज्ञातसंख्यत्वेन श्रुतसंख्याया अभ्यासेन पूरणेऽपि प्रकृते कर्मैक्यस्यानवगमेन वैषम्यात् । नत्वाख्यातस्य सकृच्छ्रवणात्कर्मैकत्वम् । आख्यातमात्रस्याप्रामाण्यात् । यावन्ति हि वाक्ये पदानि युज्यन्ते तावतां संहत्य प्रामाण्याभ्युपगमात् ॥

२ अ० २ पा० ९ अधि०

क्वचिद्गुणभेदात्। यथा चातुर्मास्ये—'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इति यागं विधायाम्नायते 'वाजिभ्यो वाजिनम्' इति। अत्र हि वाजिनं गुणो न पूर्वस्मिन्नेवामिक्षायागे विधीयते। उत्पत्तिविशिष्टगुणरूपामिक्षावरुद्धे कर्मणि वाजिनस्योत्पन्नविशिष्टगुणस्यासंनिवेशत्वात्*। तस्माद्वाजिनगुणकं कर्मान्तरं यद्वाजिदेवताकम्॥

२ अ० २ पा० १० अधि०

यत्र पूर्वकर्मणि ससंनिवेशो गुणस्तत्र न कर्मभेदः। यथा—'दध्ना जुहोति, पयसा जुहोति' इत्यादौ श्रूयमाणानां नानागुणानाम्। अन्यपदानालोचनेनाग्निहोत्रवाक्यमात्रालोचनान्निर्गुणस्य कर्मणोऽवगतस्य सर्वगुणयोग्यत्वात्पौर्वापर्याभावाच्चान्यावरुद्धेऽन्यस्य निवेश इत्यभावात्तत्रैव नानागुणविधानम्। प्रमाणयोस्तुल्यबलत्वात्तु दधिपयसोर्विकल्पः॥

२ अ० २ पा० ८ अधि०

क्वचित्संज्ञाभेदात्। यथा ज्योतिष्टोमं निरूप्य श्रूयते।—'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत' इति। अत्र हि न प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते। किं तु कर्मान्तराण्येवंनामान्येवंदक्षिणानि विधीयन्ते। नामान्तरश्रुतावर्थभेदस्य प्रतीयमानस्य बाधकं विनानपोद्यमानत्वात्। एवं च सहासांत्सित्या(?)र्थान्तरावगमात्प्रकरणविच्छेदे जातेऽर्थान्तरकलुषितायां बुद्धावुपनीय तत्सहस्रदक्षिणेन यजेतेति वाक्यं न ज्योतिष्टोमं गन्तुमर्हति। तस्मात्कर्मान्तराणि। एवं च 'अथैष ज्योतिः' इत्यादेरर्थवत्त्वम्। अन्यथाऽनर्थक्यं स्यात्। एतेन सहस्रदक्षिणेनेत्येतावतैव ज्योतिष्टोमस्य गुणविधिसिद्धेः। एतच्छब्दस्य प्रतिज्ञायमानकर्मवचनत्वेनाप्युपपद्यत इति सिद्धः कर्मभेदः॥

२ अ० ३ पा० ११ अधि०

क्वचित्प्रकरणान्तरात्। यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजन्ते' इत्यादि श्रूयते। अत्र हि न नैय-

* 'स्यासम्भवात् निवेशत्वात्' इति मातृका।

मिकाग्निहोत्रादौ मासो विधीयते, किं तु प्रकरणान्तरात्कर्मान्तरमेव । किमिदं प्रकरणान्तरम् । अप्रकृताभिधानं तदित्येवेहि । कथमप्रकृताभिधानम् । 'उपसद्भिश्चरित्वा' इति वचनात् । न हि नैयमिकिस्योपसदः सन्ति । तत्र ताश्च मासश्चेत्यनेको गुणः प्राप्ते कर्मणि न शक्यते विधातुमिति कर्मान्तरम् । अत्र चाप्रकृताभिधानादेव प्रकरणान्तरपर्यायाद्भेदः । अप्रकृताभिधानं तु गुणादिति न गुणाद्भेदः । वस्तुतस्तु नाप्रकृताभिधानं प्रकरणान्तरम् । तथा सति 'वाजिभ्यो वाजिनम्' इत्यत्राप्यप्रकृताभिधानादेव भेदः । अप्रकृताभिधानं तु पूर्वकर्मासंयोगिनो गुणादिति तत्रापि प्रकरणान्तरमेव स्यान्न तु गुणः । एवं शब्दान्तराभ्याससंज्ञाभिरप्यप्रकृतविषयतैव विधेर्बोध्यते । न साक्षात्कर्मभेद इति सर्वत्रेदमेव भेदकं स्यान्न तु शब्दान्तरादि । किं तु पूर्वकर्मासन्निधानं प्रकरणान्तरम् । मासाग्निहोत्रं च नैयमिकाग्निहोत्रसंनिहितमिति तद्भेदकं प्रकरणान्तरम् । ननु दूरस्थकर्मानुवादेनापि गुणविधिर्दृष्ट एव । यथा— 'आहवनीये जुहोति' इत्यत्र जुहोतीति प्राप्तवन्निर्देशादाहवनीयो विधीयते यज्जुहोति तदाहवनीय इति चेत् । सत्यम् । तत्र हि आहवनीय उपादेयोऽत्र कालोऽनुपादेयो गुणः । यत्र हि वाक्येऽनुपादेयो देशकालादिको गुणः श्रुतो न तत्र दूरस्थकर्मोपस्थापनसम्भवः । यत्कुर्यादित्येवंरूपप्राप्तवन्निर्देशे तु दूरस्थकर्मोपस्थापनं सम्भवत्येव । तथा च नित्याग्निहोत्रे आहवनीयस्य गुणत्वेन विधानसम्भवेऽपि न मासस्य गुणत्वेन विधानम् । तस्यानुपादेयगुणत्वादिति मासगुणकं कर्मान्तरमेवेति दिक् ॥ पर्यवसितं कर्मभेदानिरूपणम् ॥

भेदप्रसङ्गात् प्रयोगभेदश्चिन्त्यते—

२ अ० ३ पा० १३ अधि०

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति काम्यप्रयोगं विधायाम्नायते—'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति । सोऽयमभ्यासः किं कर्मार्थ उत पुरुषार्थः । पूर्वपक्षे काम्यस्यैव प्रयोगस्याभ्यासविधिः । सिद्धान्ते तु प्रयोगान्तरं नित्यं विधीयते । तत्र कर्मार्थविधौ* प्रकरणानुग्रहः । पुरुषार्थविधौ तु प्रकरणबाधः स्यात् । अतोऽभ्यासविधिर्यावज्जीवकालं त्याग-

* 'कर्माङ्गविधौ'—इति मातृका ।

मभ्यस्येदिति प्राप्ते ब्रूमः । एवं हि जीवनवाचिना शब्देन तत्सम्बद्धः कालो लक्षणीयो यजिना च यागाभ्यास इति लक्षणाद्वयं स्यात् । नचैतदुचक्तम् । जघन्यत्वात् । तस्माज्जीवने निमित्ते पुरुषस्य प्रत्यवायपरिहाराय दर्शपूर्णमासप्रयोगो विधीयत इति सिद्धम् ॥

२ अ० ४ पा० २ अधि०

इदमपरं चिन्त्यते । शाखान्तरेषु किमग्निहोत्रादि भिद्यते किं वा सर्वशाखास्वेकमेव । किं तावत्प्राप्तम् । अविशेषपुनःश्रुतिलक्षणादभ्यासात्, दूरत्वलक्षणाच्च प्रकरणान्तरात्तद्भेदः । तथा गुणादपि क्वचित् 'तदैन्द्राग्नमेकादशकपालं निर्वपेत्' इति श्रुतम्, क्वचित् 'द्वादशकपालम्' इति । अत्र ब्रूमः । पुनःपुनःश्रुत्या तावद्विधिभेदः सिध्यतु न कर्मभेदः । विहितस्य पुनर्विधानायोगात् । न च विधिभेदात्कर्मभेदो नियतः । शब्दभेदस्यार्थभेदाप्रयोजकत्वात् । विहितस्यापि पुरुषान्तरं प्रति पुनर्विधिसम्भवात् । एकादशद्वादशकपालयोस्तूभयोरप्युत्पत्तिशिष्टत्वान्न बलाबलम्, किं तु विकल्प एव । तस्मादभेदः ॥

२ अ० ३ पा० १४ अधि०

इदमपि चिन्त्यते । किं पौर्णमास्याममावास्यायां वाऽऽग्नेयाख्यकर्मैकमेवाहोस्विद्भिन्नम् । तत्र 'आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति कालद्वयस्य संख्यावत्पृथक्त्वनिवेशित्वात्कर्मभेद इति राणकाचार्याः । पार्थसारथिमिश्रास्तु कर्मैक्यमाहुः । तदभिप्रायस्तु कालो हि न संख्यावत्कर्मानुबन्धिविशेषणम् । किं तु प्रयोगानुबन्धि । तेन कालभेदात्प्रयोगभेदमात्रं न तु कर्मभेद इति ॥

इति भट्टकेशवविरचिते मीमांसार्थप्रकाशे द्वितीयः परिच्छेदः ।

---

## तृतीयः परिच्छेदः ।

## अथातः शेषलक्षणम् ॥

अत्र पारार्थ्यं शेषत्वम् । अङ्गत्वमिति यावत् । उपकारकत्वं शेषत्व-

मिति बादरिः । तान्यङ्गानि द्विविधानि—सिद्धरूपाणि, क्रियारूपाणि च । तत्राद्यानि—जातिद्रव्यसंख्यादीनि अदृष्टार्थान्येव । क्रियारूपाण्यपि द्विविधानि—संनिपत्योपकारकाणि, आरादुपकारकाणि च । तत्र कर्माङ्गद्रव्याद्युद्दिश्य विधीयमानानि संनिपत्योपकारकाणि । एतान्येव सामवयिकानीत्युच्यन्ते । द्रव्यदेवतासंस्काररूपाणि । द्रव्यं [हविः] पुरोडाशादि । देवता चतुर्थ्यन्तशब्दात्मिका । संस्कारा अवघातप्रोक्षणादयः । तत्रावघातादि दृष्टार्थमेव । हविः पुरोडाशादि तु दृष्टादृष्टार्थम् । तत्र त्यागांशेनादृष्टम्, दृष्टं देवतास्मरणादि तु स्वतः । यच्चोभयार्थं तदाश्रयिकर्मेति व्यवह्रियते । स्वातन्त्र्येण विधीयमानान्यारादुपकारकाणि । यथा—प्रयाजानुयाजादीनि । अत्र संनिपत्योपकारकाणि न यागस्वरूपमात्रे उपयुज्यन्ते । तैर्विनापि यागोत्पत्तिसम्भवात् । किं तु यागस्यातीन्द्रिये फलसाधनत्वस्वरूपे । यागस्य तेनैव रूपेण समीहितत्वात् । स्वरूपेण च कष्टत्वात् । तदेव च चोदनैकगम्यः श्रेयस्साधनत्वमपूर्वं नाम । आरादुपकारकाणि तु यद्यपि यागादुत्पत्त्यपूर्वोत्पत्तौ नोपयुज्यन्ते । सामवयिकेभ्य एवावश्यकेभ्यस्तदुत्पत्तेः । उत्तरकालोत्पन्नैश्च तैस्तदुत्पत्त्यसम्भवाच्च । तथाऽप्युत्पत्त्यपूर्वोत्पत्त्युपयोगशून्यानां तेषां यागसाधनत्वेनावगतानां यागस्य फलोपधायकत्वं येन रूपेण भवति तादृशं स्वरूपम् । तदेव चरमापूर्वमिति गीयते । नचैवमुत्पत्त्यपूर्ववैयर्थ्यमितिवाच्यम् । यागस्य स्वरूपतो नष्टत्वात् । तत्र तैरङ्गैरुपकाराधानासम्भवात् । तस्मादुत्पत्त्यपूर्वात्मक एव यागस्वरूपे तैरुपकार आधातुं शक्य इति तत्स्वीकारः । अपिचोत्पत्त्यपूर्वाभावे सामवयिकाङ्गानां वैयर्थ्यं स्यात् । न च तेषामपि परमापूर्वार्थता । अवघातपुरोडाशादीनां चिरविनष्टत्वेन परमापूर्वोत्पादकत्वासम्भवात् । स चोपकारो यागगत इत्येकः पक्षः, आत्मन्येव स उपकारः परं तु यागेन सहैकार्थसमवायाद्यागोपकार इत्युच्यते ॥

'फलेभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या सा परापूर्वमुच्यते ॥'

इति वार्तिकस्य पक्षद्वयेऽपि सङ्गतेः ॥

पुनरङ्गानि द्विविधानि । भाव्युपयोगीनि, भूतोपयोगीनि च । तत्र

द्यानि प्रधानपूर्वभावीनि । तेषामपूर्वोत्पत्तावुपयोगः । अपराणि प्रधानोत्तरभावीनि । तेषां चापूर्वस्थितावुपयोग इति दिक् ॥

तच्च शेषत्वं श्रुत्यादिषट्प्रमाणकम् । स्वार्थबोधनेऽन्यानपेक्षः शब्दः श्रुतिः । यथा—'व्रीहीनवहन्ति, ग्रहं सम्मार्ष्टि' इत्यादौ द्वितीया । इयं हि निरपेक्षैव व्रीह्यादीनामवघातादिजन्यफलशालित्वं बोधयन्ती अवघातादिशेषित्वं प्रतिपादयति ॥ अयं तु विभागः । द्वितीया शेषिविभक्तिरेव । तथा सम्प्रदानचतुर्थ्यपि ; यथा—'मैत्रावरुणाय दण्डं प्रयच्छति' इति । तथा तादर्थ्यचतुर्थ्यपि ; यथा—'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति । इतरास्तु शेषविभक्तय एव ; यथा—'पशुना यजेत' इत्यत्र तृतीयया पशोर्यागशेषत्वम् । यथा—'अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति' इत्यत्र द्रव्यपरिच्छेदकत्वेनारुण्यादीनां गुणानां क्रियाङ्गत्वम् ॥

पदानामर्थप्रकाशनसामर्थ्यं लिङ्गम् । यथा—'बर्हिर्देवसदनं दामि' इत्यस्य मन्त्रस्य लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः प्रतीयते ॥

तदर्थप्रतिपादकपदासमभिव्याहृतपदसमूहो वाक्यम् । यथा—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये त्वा जुष्टं निर्वपामि' इत्यत्र समवेतार्थतया चरमभागस्य लिङ्गान्निर्वापे विनियोगप्रतीतौ तदेकवाक्यतापन्नस्य देवस्येत्यादेः समस्तस्यैव विनियोगः प्रतीयते ॥

प्राकृतोपकारानिवर्त्येतिकर्तव्यताकांक्षा प्रकरणम् । वैकृतभावनेतिकर्तव्यताकांक्षायाः प्रकरणत्वनिरासाय निवर्त्येन्यन्तम् । सा ह्यतिदेशवाक्यसमर्पिताङ्गोपकारनिवर्त्यैवेति नातिप्रसङ्गः । इतिकर्तव्यता षट्करणाकांक्षायाः प्रकरणत्ववारणाय । तच्च द्विविधम् । महाप्रकरणमवान्तरप्रकरणं च । तत्र फलभावनायाः प्रकरणमाद्यम् । यथा दर्शपूर्णमासप्रकरणे श्रूयते—'समिधो यजति, तनूनपातं यजति' इत्यादि । तेषां च फलभावादस्ति उपकार्याकांक्षा । क्रतोरप्यस्ति कथमित्युपकारकाकांक्षा । एतेनोभयोःसाकांक्षत्वादेकवाक्यत्वम् । तथा हि—यागेन स्वर्गं कुर्यादिति फलवाक्यार्थः । तत्र न ज्ञायते यागेन केन प्रकारेण स्वर्गः कर्तव्य इति प्रकाराकांक्षा । ततश्चोपकार्याकांक्षोपेतात् 'समिधो यजति' इत्यादि वचनादेवं ज्ञायते । अयमस्य स्या-

IGNCA RAR
ACC. No. R-551



SANS
181.42
BHA

पारो येन यागात् स्वर्गो भवतीति। सम्भवति च समिदादिक्रियाणां यागोपकारकत्वमदृष्टद्वारकम्। अवघातादिसन्निपत्योपकारकाणां दृष्टद्वारकमेवेत्युक्तमधस्तात्। यदाहुः—

'अतः प्रधानवाक्यस्य प्रकाराकांक्षतावशात्।
फलाकांक्षं प्रयाजादि तदङ्गत्वं प्रपद्यते॥' इति।

३ अ० १ पा० १० अधि०

अङ्गभावनायाः प्रकरणं द्वितीयम्। यथा दर्शपूर्णमासयोः प्रयाजसमीपे श्रूयते—'अभिक्रामं जुहोति' इति। तत्रावान्तरप्रकरणात्प्रयाजहोमाङ्गमभिक्रमणम्॥

ननु प्रधानफलभावनायां कथंभावाकांक्षायां तत्प्रकरणस्थानि सर्वाण्यपि प्रधानमेवानुसरन्ति। अन्यथा तेषां मिथोङ्गाङ्गिभावापत्तावव्यवस्थितशास्त्रार्थापत्तिरिति चेत्। भवेदेवम्, यद्यङ्गानामवान्तरप्रकरणं न स्यात्; अस्ति चावान्तरप्रकरणम्, क्वचिद्यत्र सन्दंशः। तथा हि। प्रयाजान्विधाय 'समानयते उपभृतः' इत्यादिगुणान्विधाय 'अभिक्रामं जुहोति' इत्युक्त्वा 'यो वै प्रयाजानां मिथुनं वेद स समिधो बर्हीरिव यजति' इत्यादि[ना प्रशस्य] 'यत्प्रयाजानिष्ट्वा हवींष्यभिघारयति' इति प्रयाजपरामर्शान्नूनमेतावता प्रदेशेन प्रयाजाः समाप्यन्त इत्यवगमात् तन्मध्यपतितमभिक्रमणं तदतिक्रमेण नान्यत्र गच्छति॥ भवति चाङ्गभावनायामपि भावनासाम्येनाविज्ञातप्रकारत्वात्कथमित्याकांक्षा। यत्र च न सन्दंशस्तत्र सन्नपि कथम्भावो न विनियोजकः। सर्वेषामपि निष्फलत्वेन कः शेषः कस्य शेषित्वमिति विशेषानवगमेन प्रधानमात्रगामित्वात्॥

३ अ० ३ पा० ५ अधि०

स्थानं क्रमो देशसामान्यलक्षणः। तत् द्विविधम्। पाठसादेश्यमनुष्ठानसादेश्यं च। पाठसादेश्यमपि द्वेधा। यथासंख्यपाठः सन्निधिपाठश्चेति। तत्राद्यं यथा दर्शपूर्णमासयोरुपांशुयाजक्रमे—'दब्धिर्नामासि' इति मन्त्रः पठ्यते। तत्र यथाक्रमेण पठितेषु मन्त्रेषु मन्त्रद्वयस्याग्नेयवैष्णवयागसम्बन्धे लिङ्गात्प्रतीतेऽपि नोक्तमन्त्रस्य विनियोजकान्तरमस्तीति यथासंख्यपाठा-

त्रोपांशुयाजे विनियोगसिद्धिः। तथा हि। कर्मणां मन्त्राणां च क्रमेण समाम्नातानां यस्य कर्मणः क्रमे यो मन्त्रः समाम्नायते स तस्मिन्नवगते तत्क्रमेऽपि तिष्ठते तत्क्रमोपस्थितौ च स मन्त्र इति तस्य मन्त्रस्य कैमर्थ्याकांक्षायां तत्कर्मार्थत्वं कल्प्यते यथासंख्यपाठादेवेति॥ सन्निधिपाठो यथा सान्नाय्यपात्रशुन्धनक्रमे—'शुन्धध्वम्' इति मन्त्रपाठः। तेन तस्य तदर्थत्वम्॥ अनुष्ठानसादेश्यं यथा—ज्योतिष्टोमे त्रयः पशुयागाः। अग्नीषोमीयः, सवनीयः, अनुबन्ध्यश्चेति। तत्राद्य औपवसथ्येऽह्नि। 'स एष द्विदैवत्यः पशुरौपवसथ्येऽह्नि आलब्धव्यः' इति वचनात्। द्वितीयः सुत्याकाले। तृतीयस्त्वन्ते। इत्थं च ये पशुना औपवसथ्येऽह्नि पठ्यन्ते तेषामग्नीषोमीयार्थत्वमेकदिनानुष्ठानसादेश्यात्। पाठसादेश्यस्यादर्तव्यत्वे तेषां धर्माणामग्नीषोमीयपश्वर्थत्वं न स्यात्। तस्य क्रयसन्निधौ पाठात्॥

३ अ० ३ पा० ६ अधि०

समाख्या यौगिकः शब्दः। यथा—हौत्रम्, औद्गात्रम् इत्यादि। अत्र हि होतुरिदं हौत्रमित्यादियोगबलेन हौत्रादिसमाख्यातानां कर्मणां होत्राद्यनुष्ठीयमानत्वं प्रतीयते। तदुक्तम्—

'श्रुतिर्द्वितीया, क्षमता च लिङ्गं, वाक्यं पदान्येव सुसंहितानि।
सा प्रक्रिया या कथमित्यपेक्षा, स्थानं क्रमो, योगबलं समाख्या॥' इति।

अत्र द्वितीया तृतीयादेरप्युपलक्षणम्॥

अत्र श्रुत्यादीनामनेकेषामेकार्थोपनिपाते तु पूर्वं पूर्वं प्रबलमुत्तरोत्तरं च दुर्बलम्। तथा च सूत्रम्—(३ अ॥ ३ पा॥ १४ सू॥)॥

**'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां**
**समवाये पारदौर्बल्यमर्थविप्रकर्षात्।'** इति।

३ अ० ३ पा० ७ अधि०

प्रथमं श्रुतिलिङ्गयोर्बलाबलं चिन्त्यते। यथा—'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रूयते। तत्र श्रुत्या तावदैन्द्री ऋक् गार्हपत्योपस्थाने विनियुज्यते। लिङ्गेन तु इन्द्रोपस्थाने। इन्द्रपदस्येन्द्रप्रकाशने सामर्थ्यात्। तदेवं विरोधे प्राप्ते श्रुत्यैव विनियोगो न तु लिङ्गात्। तथा हि। प्रथमं म-

न्त्रान्मन्त्रार्थावगमः ततोऽप्यापीन्द्रप्रकाशने शक्तिरिति सामर्थ्यनिरूपणम्। तत्र कैमर्थ्याकांक्षायामिन्द्रशेषत्वे श्रुतिः कल्प्या—'अनयेन्द्रमुपतिष्ठेत्' इति। तथा च विनियोजकश्रुतिकल्पनद्वारा तस्य प्रामाण्यं वाच्यम्। तच्च न सम्भवति। 'गार्हपत्यम्' इति प्रत्यक्षश्रुत्या गार्हपत्यस्थाने विनियुक्तस्य मन्त्रस्य नैराकांक्ष्यात्। न चेन्द्रपदस्य गार्हपत्योपस्थानेऽसामर्थ्यात् नैवमिति वाच्यम्। लक्षणया तत्प्रकाशकत्वसम्भवात्॥

३ अ० ३ पा० ८ अधि०

अथ लिङ्गवाक्ययोः—'स्योनं ते सदनं कृणोमि घृतस्य धारया सुषेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति श्रूयते। अत्र वाक्येन पूर्वार्धस्यापि पुरोडाशस्य प्रतिष्ठापने, सदनकरणे चोत्तरार्धस्यापि विनियोगः। लिङ्गेन तु पूर्वार्धस्य सदनकरणे प्रतिष्ठापने तूत्तरार्धस्येत्येवं विरोधे प्राप्ते ब्रूमः। विभज्यैव पूर्वोत्तरार्धयोर्विनियोगः, पूर्वस्य सदनकरणे उत्तरस्य प्रतिष्ठापने। तथा हि। उत्तरार्धस्य सदनकरणे लिङ्गमपरिकल्प्य पूर्वार्धस्य प्रतिष्ठापने लिङ्गमपरिकल्प्य न कृत्स्नो मन्त्रो विनियोक्तुं शक्यत इति कथंचित् स्वार्थविशिष्टपुरोडाशसदनकरणप्रतिष्ठापनसामर्थ्यं लक्षणादिना कल्पयित्वा विनियोजकश्रुतिकल्पनं ततो विभागः कृत्स्नमन्त्रस्येति विलम्बः। पूर्वार्धमात्रस्य हि सदनकरणे उत्तरार्धस्य च प्रतिष्ठापने सामर्थ्यं प्रत्यक्षमेवेति तेन श्रुतिमनुमाय शीघ्रं विनियोग इति विभज्यैव स इति॥

३ अ० ३ पा० ९ अधि०

अथ वाक्यप्रकरणयोः—दर्शपूर्णमासयोः सूक्तवाकनिगदः। 'अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्। इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्' इत्यादि। अत्र देवतावाच्यग्नीषोमादिपदं पौर्णमास्यादिकाले यथादैवतं विभज्य प्रयोज्यमिति स्थितमधिकरणान्तरे*। यत्त्विदं हविरित्यादिकमवशिष्टं पदजातं तदग्नीषोममन्त्रगतमपि अग्नीषोमपदपरित्यागेनामावास्यायां पठनीयम्। एवमिन्द्राग्नीमन्त्रगत-

* ३ अ० २ पा० ६ अधि०

मपि पौर्णमास्यामिन्द्राग्नीपदपरित्यागेन पठनीयम् । तथा सत्येषां मन्त्रभागानां सर्वशेषत्वबोधको दर्शपूर्णमासप्रकरणपाठोऽनुगृह्येतेति प्राप्ते ब्रूमः । प्रकरणाद्वाक्यं बलीयः । द्व्यन्तरितप्रामाण्यापेक्षया एकान्तरितप्रामाण्यस्येव त्र्यन्तरितप्रामाण्यापेक्षया द्व्यन्तरितप्रामाण्यस्य प्राबल्यात् । तथा हि । प्रकरणस्यात्र विनियोजकत्वेऽग्नीषोममन्त्रशेषस्येन्द्राग्निपदान्वयाश्रवणात्प्रथमं तदन्वयरूपं वाक्यं कल्प्यम्, तेन च वाक्येन इन्द्राग्निप्रकाशनसामर्थ्यरूपं लिङ्गं कल्प्यम्, तेन चानेन मन्त्रभागेन च 'इन्द्राग्निविषयां क्रियां कुर्यात्' इति विनियोजिका श्रुतिः कल्प्यत इति त्रिभिर्व्यवधानं भवति । अग्नीषोमपदान्वयरूपं वाक्यं तु श्रूयमाणमिति लिङ्गश्रुतिभ्यामेव व्यवधीयते । तस्माद्वाक्येन प्रकरणस्य बाधितत्वात् तत्तन्मन्त्रस्य तत्र तत्रैव शेषत्वमिति ॥

३ अ० ३ पा० १० अधि०

अथ स्थानप्रकरणयोः—राजसूयेऽस्ति अभिषेचनीयाख्यः सोमयागः तत्सन्निधौ विदेवनादयः समाम्नायन्ते । 'अक्षैर्दीव्यति, राजन्यं जिनाति, शौनश्शेपमाख्यापयति' इति । जिनाति जयति । बह्वृचब्राह्मणे समाम्नातं शुनश्शेपविषयकमुपाख्यानम् । शुनश्शेपसन्निधिबलाद्देवनादीनामभिषेचनीयाङ्गत्वे प्राप्ते ब्रूमः । राजसूयस्य कथम्भावाकांक्षायामनुवृत्तायां विहिता विदेवनादयः प्रकरणेन राजसूयस्य शेषाः । राजसूयश्च बहुयागात्मक इति तत्रत्यसर्वयागशेषत्वम् । न चाभिषेचनीयमात्रस्य कदाचिदाकांक्षा विदेवनादिष्वस्ति, ज्योतिष्टोमविकृतित्वेनातिदिष्टैः प्राकृताङ्गैरेव तन्निवृत्तेः । संनिधिबलादाकांक्षोत्थाप्यत इति चेत्, तर्ह्याकांक्षारूपं प्रकरणं परिकल्प्य तद्द्वारा वाक्यलिङ्गश्रुतिकल्पनया सन्निधिर्विप्रकृष्यते । राजसूयाकांक्षात्मकं प्रकरणं क्लृप्तत्वादेकयाकांक्षया संनिकृष्यते ॥

३ अ० ३ पा० ११ अधि०

अथ स्थानसमाख्ययोः—'शुन्धध्वं दैव्याय कर्मणे' इत्ययं मन्त्रः पौरोडाशिकमित्येवं समाख्याते काण्डे समाम्नातः । स समाख्यया पुरोडाशकाण्डोक्तानामुलूखलजुह्वादीनामपि शोधनेऽङ्गमिति प्राप्ते ब्रूमः । पौरो-

डाशिकमिति समाख्यायां प्रकृतिः पुरोडाशमभिधत्ते, प्रत्ययस्तु काण्डं। न चैतावता कृत्स्नपुरोडाशपात्राणां मन्त्रसंनिधिः प्रत्यक्षेण लभ्यते। किं त्वर्थापत्त्या कल्प्यते—यदि तेषामत्र संनिधिर्न कल्प्येत, तदा मन्त्रस्य पौरोडाशिकसमाख्या न स्यात्। न ह्यसंनिहितानां 'इषेत्वा' इत्यादिमन्त्राणां सम्भवति। तस्मात्समाख्यया संनिधिं परिकल्प्य ततः प्रकरणवाक्यालिङ्गश्रुतीश्च परिकल्प्य शुन्धनमन्त्रस्य पुरोडाशपात्रमात्रे विनियोगः कर्तव्य इति पञ्चभिर्विप्रकर्षः। सांनाय्यपात्रशोधने तु प्रत्यक्षेण संनिधिना प्रकरणादिचतुष्टयकल्पनानन्तरं विनियोग इति संनिकर्ष इति सर्वं सुस्थम्॥

इति भट्टकेशवविरचिते मीमांसार्थप्रकाशे तृतीयः परिच्छेदः।

---

## चतुर्थः परिच्छेदः।

४ अ० ३ पा० १ अधि०

अथातः क्रत्वर्थपुरुषार्थयोर्लक्षणम्॥ यत् भावनाकथंभावाकांक्षापूरणार्थं विधीयते तत् क्रत्वर्थम्। यथा—पर्णमयीत्वम्। तच्चावत्तहविर्धारणद्वारेवेति बोध्यम्। 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इति। तत्र फलश्रवणं त्वर्थवाद एव। तदुक्तम्—'फलवत्संनिधावफलं तदङ्गम्' इति॥

४ अ० ३ पा० ४ अधि०

तथा ज्योतिष्टोमे—'पयो व्रतं ब्राह्मणस्य' इत्यादि श्रूयते। तत्तु क्रत्वधिकृतयजमानसंस्कारद्वारा क्रत्वर्थम्॥

एवं क्रतुप्रयुक्तवपनादेः पुरुषार्थभूतस्यापि यजमानसंस्कारद्वारा क्रत्वर्थत्वमपि॥ न चैकत्र क्रत्वर्थत्वपुरुषार्थत्वयोर्विरोध इति वाच्यम्। एकत्र नित्यत्वकाम्यत्वयोरिवानयोरप्यविरोधात्। एतेन—'गङ्गायां भास्करक्षेत्रे' इत्यादिस्मृतिवचोऽपि व्याख्यातम्॥

४ अ० १ पा० २ अधि० चतुर्थवर्णकम्॥

येस्तु द्रव्यार्जननियमो ब्राह्मणस्य प्रतिग्रहादिना राजन्यस्य ज[...]

दिना वैश्यस्य कृष्यादिना शूद्रस्य सेवादिना [स] पुरुषार्थ एव। 'अर्जितं द्रव्यं पुरुषं प्रीणयति' इति प्रत्यक्षेण पुरुषार्थत्वस्यैव विज्ञानात् ॥

४ अ० १ पा० ३ अधि०

तथा—'तस्य व्रतम्' इत्युपक्रम्य—'नोद्यन्तमादित्यमीक्षेत' इति श्रूयते। अत्रोपक्रमे कर्मवाचिव्रतपदश्रवणात्पर्युदासलक्षणया कर्मविशेषोऽनीक्षणसङ्कल्परूपश्चोद्यते। तस्य च वाक्यशेषादक्षयः फलमिति पुरुषार्थः सः। न चात्र निषेध एव किं नेति वाच्यम्। तस्य व्रतत्वाभावेनोपक्रमविरोधात् ॥

४ अ० ३ पा० ३ अधि०

किं चिदुभयार्थम्। यथा—अग्निहोत्रहोमः। 'दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्यद्वयस्य परस्परमनाकांक्षत्वात्प्रथमेन क्रत्वर्थत्वं द्वितीयेन च फलार्थत्वेन पुरुषार्थत्वमित्यध्यवसीयते ॥

६ अ० ४ पा० ४ अधि०

एवं दर्शपूर्णमासप्रकरणे श्रूयते—'भिन्ने जुहोति, स्कन्ने जुहोति' इति। अत्र भेदननिमित्तहोमो विधीयते उत भिन्नसंस्कारार्थो होमः। तत्र भिन्नसंस्कारार्थत्वे वाक्येन होमस्य प्रयोजनसम्बन्धः संनिपत्योपकारिता च लभ्यते। भेदननिमित्तकत्वे तु प्रकरणेन होमस्य यागसम्बन्धो लभ्यते। स च दुर्बलो वाक्यापेक्षया दुर्बलेन प्रकरणेन बोधितत्वात्। अत्र वदामः। न भिन्नसंस्कारार्थो होमः नित्यानित्यसंयोगविरोधात्। कपालार्थे होमे सति निमित्तसंयोगो नास्ति। अश्रुतनिमित्तकानां च दर्शपूर्णमासापूर्वमनुष्ठापकमिति यावद्दर्शपूर्णमासापूर्वेण होमोऽनुष्ठाप्य इत्यायाति। न चैतत्सम्भवति। उपकार्यस्य भिन्नकपालस्य कादाचित्कत्वादनुष्ठापकस्य चापूर्वस्य नित्यत्वात्। तथा च दर्शपूर्णमासयोर्होमेन नित्यमुपकुर्याद्भिन्नसंस्कारद्वारेति वाक्यार्थासम्भवः। अनित्येन नित्योपकाराभावात् ॥

यत्र त्वनुष्ठापकं फलं च नित्यं तत्र च तयोरेकेन कर्मणा सम्बन्धः सम्भवति। यथा—'यावज्जीवमग्निहोत्रं जुहुयात्' इति वाक्यवशाज्जीवननिमित्तं होमं प्रयुङ्क्ते। स च होम उपात्तदोषोपघातार्थः। तत्र जीवस्य पु-

रुषदोषस्य च पूर्वोपात्तस्य सर्वदा विद्यमानत्वादविरुद्धः सम्बन्धः ॥

यत्र च प्रयोजकं फलं च द्वयमप्यनित्यं तत्राप्यस्ति सम्बन्धः। यथा—ब्रह्महत्यादि अनित्यप्रायश्चित्तनिमित्तं पुरुषदोषोऽप्यनित्यस्तत्र प्रायश्चित्तं ब्रह्महत्याप्रयुक्तदोषनिर्घातायेति वाक्यार्थः सम्भवत्येवाविरोधात्।

होमस्य भेदननिमित्तकत्वे तु न नित्यानित्यविरोधः। प्रयोगविशेषावच्छिन्नदर्शपूर्णमासापूर्वस्यैव तदनुष्ठापकत्वात्। तस्य चानित्यत्वात्। इत्थं च भेदने निमित्ते होमः भेदनं चैकदेशेन कार्त्स्न्येन वेति न कश्चिद्विशेषः ॥

अथ मास्तु होमस्य भिन्नसंस्कारार्थत्वम्, तथापि सप्तमीश्रुत्या भिन्नस्याधारत्वेन होमार्थत्वलाभात्। कृत्स्नभिन्नस्य चाधारत्वायोगादेकदेशभिन्न एवेत्युच्यते। तत्रेदं दूषणम्। यदि भिन्नं कपालं होमाधिकरणतयाऽनेन वाक्येन विधीयते तदिदं न कर्मान्तरं सम्भवति, विशेषणपरे विधौ विशिष्टविधेरन्याय्यत्वात्; किं तु प्रकृतहोमानुवादेन भिन्नमधिकरणं विधीयते इत्येव स्यात्। तथा चाहवनीयो बाध्येत, यथा प्रकृतिसम्बद्धेन पाञ्चदश्येनानारभ्याधीतं साप्तदश्यं बाध्यते, तथानारभ्याधीतस्याहवनीयस्य 'भिन्ने जुहोति' इति विशेषबाधितभिन्नेन कपालेन बाधसम्भवात् ॥ किं चाहवनीयस्य होमान्तरे सावकाशत्वात् प्रकृतहोमानुवादेन विधीयमानस्य भिन्नस्यात्रानवकाशत्वात् 'सावकाशनिरवकाशयोर्निरवकाशं बलीय' इति न्यायेनाप्याहवनीयो बाध्येतैव। यथा 'पदे जुहोति' इति विधिविहितपदेनाहवनीय इति। यदा तु भिन्नस्य निमित्तत्वं तदा निमित्तस्याविधेयत्वादगत्या कर्मान्तरविधिरेवेति न कश्चिद्दोषः ॥

६ अ० ४ पा० ६ आध०

एवं दर्शपूर्णमासयोः श्रूयते—'यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति। अत्र उभयमपि निमित्तं भवत्युत नेति। तत्र हविरिवोभयमित्यस्यापि श्रुतत्वाविशेषादुभयमपि निमित्तमिति प्राप्ते ब्रूमः। 'हविरार्तौ पञ्चशरावं निर्वपेत्' इति, 'यच्च हविस्तदुभयम्' इति हविः शब्दस्य द्विरुच्चारणाद्वाक्यभेद इति नोभयत्वं विवक्षितमिति। एतच्च वाक्यं दर्शपूर्णमासप्रकरणे श्रुतमिति कृत्वा विचारितम्। परमार्थतस्तु 'यस्य सान्-

दुग्धमार्तिमार्च्छति' इत्यादि प्रकृत्येदं वाक्यं श्रूयते। तस्याद्यस्योभयमित्येतावन्मात्रमत्र वाक्ये विवक्षितम्। हविरार्तिशब्दौ तु प्रकरणप्राप्तानुवादौ। न च प्रकरणलभ्यार्थोवासं भिनतीत्युभयार्तावेव पञ्चशराव इति॥

६ अ० ८ पा० ३ अधि०

'एतया निषादस्थपतिं याजयेत्' इत्यनेन विहितस्थपतीष्टौ लौकिकाग्नावेव। तस्याहवनीयाभावात्। न च चोदकादाधानप्राप्त्या न तत्राहवनीयासिद्धिरिति वाच्यम्। तस्य दर्शपूर्णमासाङ्गत्वेन चोदकादलाभात्। न चाङ्गभूताग्निद्वारापि तत्प्रयुक्तिसम्भवः। आधानसंस्कृताग्नीनामलौकिकत्वेन निर्ज्ञातप्रकारत्वात्। शास्त्रैकसमधिगम्यं ह्यग्न्याधानम्। शास्त्रं च 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादि ब्राह्मणादिकर्तृकाधानमेव तदुत्पादकं भवतीति प्रतिपादयतीति कुतो निषादकर्तृकस्याधानस्याग्न्युत्पादकत्वम्। तस्मादाहवनीयाभावा-ल्लौकिकाग्नावेव स्थपतीष्टिरिति संक्षेपः॥

इति श्रीभट्टकेशवविरचिते मीमांसार्थप्रकाशे चतुर्थः परिच्छेदः।

Indira Gandhi National Centre for the Arts

## पञ्चमः परिच्छेदः।

अथातः क्रमलक्षणम्॥ क्रमो नामानन्तर्यम्। अव्यवहितत्वमिति यावत्। तच्चैकपदार्थध्वंसोत्पत्तिक्षणवर्तित्वमपरपदार्थस्येति केचित्। आनन्तर्यं पदार्थान्तरं अनन्तराकारानुगतप्रतीतिप्रमाणकमित्यन्ये॥

स च षड्विधः। श्रौतार्थपाठस्थानमुख्यप्रावृत्तिकभेदात्॥

५ अ० १ पा० १ अधि० तृतीयवर्णकम्॥

तत्र क्रमपरं तद्विशिष्टपदार्थपरं वा वचनं श्रुतिक्रमः। यथा—'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति। वेदं कृत्वा वेदिं करोति। वषट्कर्तुः प्रथमभक्षः' इत्यादि॥ 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इति तु नोदाहरणम्। यतो हृदयाद्यवदानमवश्यमिह विधेयम्; ततः पाठक्रमादेवानन्तर्यस्य प्राप्तेर्न क्रमविशिष्टविधिगौरवापत्तेरिति पाठप्राप्तं क्रमम्नूयायमथशब्दोऽनुवदति॥

५ अ० १ पा० २ अधि०

यः प्रयोजनवशेन पदार्थक्रम आश्रीयते स अर्थक्रमः। यथा—'अग्निहोत्रं जुहोति। यवागूं पचति' इति। अत्रोत्तरश्रुतस्य यवागूपाकस्य प्रयोजनवशात्प्राथम्यम्। होमानन्तरं क्रियमाणो यवागूपाकोऽनर्थकोऽदृष्टार्थो वा स्यात्; होमोऽपि न निवर्तेत; अतः पक्त्वा तेन होमः॥

५ अ० १ पा० ४ अधि०

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। यथा—'समिधो यजति, तनूनपातं यजति' इति क्रमेण पठितानां यागानां पाठक्रमेणैवानुष्ठानम्, न त्वनियमेन। अनुष्ठानस्य पदार्थस्मृत्यधीनत्वात् तत्स्मृतेश्च यथापठितवाक्याधीनत्वात्॥

५ अ० १ पा० ६ अधि०

विकृतौ पदार्थानां प्राकृतानुष्ठानदेशकृतोपस्थितिः स्थानक्रमः। यथा साद्यस्के आग्निदेशिकास्त्रयः पशवोऽग्नीषोमीयः सवनीयोऽनूबन्ध्यश्चेति। तेषामौपदेशिकः सहालम्भः—'सह पशूनालभत' इति। साहित्यं च सवनीयस्थान एवेति सिद्धान्तात्, तत्रोपाकरणनियोजनादीनां पश्वङ्गानां किमनियमेनानुष्ठानम्; आहोस्वित् प्रथमं सवनीयस्य पश्चादितरयोरिति सन्देहे सवनीयस्य स्थानानतिक्रमात् तस्यैवोपाकरणादयः प्रथमं कर्तव्यास्तत इतरयोः। इतरयोस्तु मिथः क्रमे अनियम एव। यद्वा प्रकृतिदृष्टपौर्वापर्यमात्यमसति बाधकेऽनुगृहीतव्यमित्यग्नीषोमीयस्योपाकरणनियोजनादि कृत्वाऽनूबन्ध्योपाकरणनियोजनादि॥

५ अ० १ पा० ७ अधि०

प्रधानक्रमेण योऽङ्गानां क्रमः स मुख्यक्रमः। यथा—दर्शपूर्णमासयोः पूर्वमैन्द्रदधिधर्माः प्रवर्तन्ते शाखाहरणादयः, तत आग्नेयस्य निर्वापादयः। याज्यानुवाक्ययोस्तु विपरीतप्रवृत्तिः पाठवशात्तत्र भूतभाविप्रवृत्तिद्वयवशात् प्रयाजशेषाभिघारणेऽनियमे प्राप्ते मुख्यक्रमादाग्नेयस्य हविषः प्रथममभिघारणं तत ऐन्द्रस्य दध्नः। अन्यथा पश्चाद्भाविनः प्रधानस्य प्रथममनुष्ठानेनात्यन्तव्यवधानं स्यादिति॥

५ अ० १ पा० ५ अधि०

सहानुष्ठीयमानेष्वनेकेषु प्रधानेषु संस्कारार्थं द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः। यथा वाजपेये प्राजापत्याः पशवो—'वैश्वदेवीं कृत्वा प्रजापत्यैश्चरन्ति' इति वाक्येनतृतीयानिर्देशात्सेतिकर्तव्यताका विहिताः सहैव क्रियन्ते। तेषां सम्प्रतिपन्नदेवताकत्वादेककालेऽनुष्ठानात्साहित्यम्। तत्र सर्वेषामुपाकरणनियोजनादौ कर्तव्ये उपाकरणं यतः कुतश्चित्पशोरारभ्य यत्र कुत्रचित्पशौ समाप्यते। नियोजनादौ तु संदेहः किं तत्रानियम आहोस्विद्येन क्रमेणोपाकरणं प्रवृत्तं स एव क्रम इति। ततो नियमाभावादुपाकरण इवात्रापि क्रमानियम इति प्राप्ते ब्रूमः। यथोपाकरणमेवानुष्ठानम्। नियोजनादीनां तुल्यप्रत्यासत्त्यनुग्रहात्। अन्यथा केषांचिदत्यन्तसंनिधानं, केषां चिदत्यन्तव्यवधानं स्यात्॥

५ अ० ४ पा०

अत्रापि श्रुतिलिङ्गादिवद्विरोधे पारदौर्बल्यम्। यदाहुः—

'श्रुत्यर्थपठनस्थानमुख्यासत्तिप्रवृत्तिभिः।<br>
एकाख्यातगृहीतानां नियतः कर्मणां क्रमः।<br>
विरोधे पारदौर्बल्यमेतेषामपि पूर्ववत्।' इति॥

इति भट्टकेशवविरचिते मीमांसार्थप्रकाशे पंचमः परिच्छेदः।

---

## षष्ठः परिच्छेदः।

अथाधिकारलक्षणम्॥ फलस्वाम्यमधिकारः, 'यजेत स्वर्गकामः' इत्यादिविधिप्रतिपाद्यः। भाव्यं च फलम्, यथा स्वर्गादिः॥

६ अ० १ पा० २ अधि०

अधिकारश्चाङ्गोपसंहारसमर्थानां न त्वन्धबधिरादीनाम्॥ ऋषीणां चाधिकारोऽस्त्येव। अनादौ संसारे पूर्वपूर्वभृग्वादिवरणसम्भवात्॥ देवतानां त्वात्मोद्देशेन त्यागासम्भवात् विग्रहाभावाच्चानधिकारः॥

६ अ० १ पा० ३ अधि०

पुरुषस्येव स्त्रियोऽप्यधिकारः । 'यजेत स्वर्गकामः' इत्यादौ उद्देश्यस्य विशेषणतया पुंस्त्वस्य ग्रहैकत्ववदविवक्षितत्वात् ॥

६ अ० १ पा० ४ अधि०

दम्पत्योस्तु सहाधिकारो न तु पृथक् । अन्यथा यजमानप्रयोगे पत्न्यवेक्षणान्वारम्भादिलोपात् पत्नीप्रयोगे च यजमानावेक्षणादिलोपात्कर्मवैगुण्यापत्तेः । यजेतेत्याख्यातोपात्तैकत्वसंख्या तु कर्तृत्वान्विता । कर्तृत्वं चाग्नीषोमयोर्देवतात्ववद्दम्पत्योर्व्यासज्यवृत्तीति न विरोधः ॥

६ अ० १ पा० ११ अधि०

दर्शपूर्णमासयोस्तु त्र्यार्षेयस्यैवाधिकारः* । 'त्रीन् वृणीते' इत्यनेन त्रित्वविशिष्टवरणाभिधानात् ॥

६ अ० १ पा० ७ अधि०

अग्निहोत्रादौ तु त्रयाणामेवाधिकारो न तु शूद्रस्यापि । वेदाध्ययनजन्यार्थज्ञानस्य क्रत्वङ्गत्वात्, शूद्रस्य चाध्ययनाभावात् ॥

६ अ० १ पा० १२ अधि०

वचनात्तु रथकारस्याप्याधानेऽधिकारः । 'वर्षासु रथकारोऽग्नीनादधीत' इत्यत्र रूढिबलेन त्रैवर्णिकप्रापकयोगबाधात् जातिविशेषत एव अधिकारप्रतीतेः ॥

६ अ० १ पा० १३ अधि०

एवं निषादस्यापि क्वचिदधिकारः । 'निषादस्थपतिं याजयेत्' इत्यत्र षष्ठीसमासे लक्षणापत्त्या कर्मधारयस्यैवाश्रयणात् ॥

६ अ० ३ पा० १ अधि०

'ऋद्धिकामाः सत्रमासीरन्' इत्यत्र कर्तृत्वस्य व्यासज्यवृत्तित्वेऽपि फलं न व्यासज्यवृत्ति । किं तु प्रत्येकमेव कृत्स्नफलसम्बन्धः । वस्तुतस्तु कर्तृत्वमपि प्रत्येकमेव । अन्यथा कर्तृबहुत्वस्य कर्तृत्वेऽनन्वयापत्तेः ॥

६ अ० २ पा० २ अधि०

दर्शपूर्णमासादौ त्वेक एवाधिकारी; न तु द्वौ, बहवो वा । न च स्व-

* 'आर्षेयस्यैव' इति मातृका

र्गकाममुद्दिश्य यागविधानादुद्देश्यगतमेकत्वं लिङ्गवदविवक्षितम्। भावनाया एव सर्वविशेषणविशिष्टायाः फलोपायत्वेन विधानात्। विशेषणभूतकर्तृसंख्याया विधेयगतत्वेन विवक्षितत्वात्। लिङ्गं तु फलकामगतमुद्देश्यविशेषणत्वादविवक्षितमेव। अत एव स्त्रियोऽप्यधिकारः समर्थितः। आख्यातोपात्तैकत्वसंख्या तु विधीयमानभावनान्वयिन्येवेति नाविवक्षितत्वेऽपि कश्चिद्धेतुरस्तीति दिक्॥

स चाधिकारस्त्रिविधः। नित्यकर्माधिकारः, काम्यकर्माधिकारो, नैमित्तिकाधिकारश्च।

६ अ० २ पा० ११ अधि०

तत्राद्यो ज्योतिष्टोमादौ—'वसन्ते वसन्ते ज्योतिषा यजेत' इति वीप्सासंयोगात्। 'जायमानो वै ब्राह्मण ऋणवा जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यो विद्यया ऋषिभ्यः' इति ऋणश्रुत्या ज्योतिष्टोमादीनामावश्यकत्वश्रवणात्। अत्र च यथाशक्ति प्रयोगेणैवाधिकारः॥

द्वितीयः सौर्यादौ—'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इत्यादिना तत्र काम्यत्वस्यैवाभिधानात्। अत्र च सर्वाङ्गोपसंहारेणैवाधिकारः। न त्वत्र नित्यनैमित्तिकयोरिव शाब्दमावश्यकत्वं येन तदनुरोधादशक्याङ्गपरित्यागो भवेत्। अङ्गानि तु शाब्दानि न शक्यन्ते बाधितुमिति शेषः॥

तृतीयो भिन्नहोमादौ—'भिन्ने जुहोति, स्कन्ने जुहोति, यस्योभयं हविरार्तिमार्च्छेत्' इत्यादिना भेदादौ निमित्ते सत्येव तेषां विधानात्। अत्रापि यथाशक्ति प्रयोगेणैवाधिकारः॥

६ अ० ३ पा० ११ अधि०

श्रुतद्रव्यापचारे तु द्रव्यान्तरं प्रतिनिधाय कर्मण्यधिकारः। सुसदृशमेव प्रतिनिधातव्यम्। न तु यत्किञ्चित्। बह्ववयवानुग्रहात्॥

६ अ० ३ पा० १३ अधि०

अत एव सोमाभावे पूतीका॥

६ अ० ६ पा० ४ अधि०

सत्रे तु वैश्वामित्राणां तत्समानकल्पानां त्राधिकारः। 'वैश्वामित्रो

होता' इति वचनेन हौत्रस्यावश्यं वैश्वामित्रकर्तव्यता । तद्भिन्नकल्पानां चानधिकारात् ॥

इति श्रीभट्टकेशवविरचिते मीमांसार्थप्रकाशे षष्ठः परिच्छेदः ।

---

## सप्तमः परिच्छेदः ।

अथातिदेशलक्षणम् ॥ विकृतौ प्राकृतधर्मप्रदेशसमर्थोऽतिदेशः ।

"प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु ।
धर्मप्रदेशो येन स्यात्सोऽतिदेश इति स्मृतः ॥' इति ।

प्रदेशः प्राप्तिः । स त्रिविधः । प्रत्यक्षवचनात्, नामधेयात्, चोदनालिङ्गानुमितवचनाच्च ॥

७ अ० १ पा० ३ अधि०

तत्राद्यो यथा। चातुर्मास्येषु चत्वारि पर्वाणि । वैश्वदेवम्, वरुणप्रघासः, साकमेधीयम्, शुनासीरीयमिति। तत्र वैश्वदेविकानामाद्यानां पञ्चहविषां यद्ब्राह्मणं तद्द्वारैव वरुणप्रघासिकेषु पञ्चस्वतिदिष्टम्— 'एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानीतराणि' इति। सोऽयं 'वार्त्रघ्नानि वा एतानि हवींषि' इत्याद्यर्थवादस्याङ्गविधीनां च 'नव प्रयाजा' इत्यादीनां वाचनिकोऽतिदेशः ॥ यथा वा—'समानमितरत् श्येनेन' इति वचनादिषावेकाहे ज्योतिष्टोमविकारे श्येनवैश्लेषिकाङ्गानां वाचनिकोऽतिदेशः ॥

७ अ० ३ पा० १ अधि०

द्वितीयो यथा कुण्डपायिनामयने श्रूयते—'मासमग्निहोत्रं जुहोति' इति। सोऽयमग्निहोत्रशब्दो नैयमिकस्यैवाग्निहोत्रस्य वाचकशब्दोऽत्र तु गौणः । नैयमिकेऽग्नये होत्रमित्येवं प्रवृत्तिनिमित्तसम्भवात् । मासाग्निहोत्रस्य तु अग्निदेवताकत्वावगमात् । तस्मान्नित्याग्निहोत्रसादृश्यविधित्सयाऽत्र शब्दः प्रयुज्यते। ततो नित्याग्निहोत्रधर्मातिदेशोऽयं 'मासमग्निहोत्रं जुहोति' इति ॥

७ अ० ४ पा० १ अधि०

तृतीयो यथा—'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम' इत्याम्नायते।

सौर्ये वैदिकेत्थम्भावातिदेशो न प्रत्यक्षवचनात् । तस्यानुपलब्धेः । नापि नाम्ना । तद्भेदात् । किं तु चोदनालिङ्गानुमितवचनात् , 'आग्नेयवत् सौर्यं कुर्यात्' इति ।

अत्रापि विरोधे श्रुत्यादिवत्पारदौर्बल्यम् ॥

इति श्रीभट्टकेशवविरचिते ममींसार्थप्रकाशे सप्तमः परिच्छेदः ।

---

## अष्टमः परिच्छेदः ।

८ अ० १ पा० १-२ अधि०

अतिदेशो निरूपितस्तस्यैवाधुना विशेषो निरूप्यते । कस्य विध्यन्तः क प्रवर्तत इति । तद्यथा—सौर्यादौ निर्वपत्यादिसामान्याद्दर्शपूर्णमासिकस्य विध्यन्तस्य प्रवृत्तिः । अनेकदैवत्येष्वग्नीषोमीयैन्द्राग्न्योः । आज्यादिद्रव्यकेषूपांशुयाजादेश्च । ऐन्द्रपुरोडाशे हविस्साहश्यादौषधविध्यन्तो न त्वैन्द्रसान्नाय्यविध्यन्तः ; हविस्सामान्यापेक्षया देवतासामान्यस्य दुर्बलत्वात् । कृष्णलचरौ चरुधर्माश्चरुशब्दसंयोगात् । पयोदध्यामिक्षादिषु दैक्षपशौ च सान्नाय्यस्य । पश्वन्तरेषु दैक्षस्य । ऐकादशिनेषु सवनीयस्य । पशुगणान्तरेषु एकादशिनस्य । अव्यक्तेषु सोमस्य ।

८ अ० १ पा० ९ अधि०

'आभिजिता यजेत' इत्यादिषु सौमिको विध्यन्तः, देवताया अश्रवणात् । ग्रहणे हि देवता श्रूयते—'ऐन्द्रवायवं गृह्णाति' इति , न यागे । प्रसङ्गात्ता यागं निवर्तयन्ति , न तु तासां यागं प्रति तादर्थ्ये प्रमाणमस्ति । तथा हि । क्रत्वर्थेन ग्रहणेन देवतास्संयुक्तास्ता यागमभिलषन्ति । तदभावे देवतात्वानिर्वाहात् । तथा यागोऽपि देवताभिलाषी । तयोर्नष्टाश्वरथवत्सम्बन्धोऽर्थाद्भवति । तस्मात्स्वार्थतया विनियुक्तदेवताविरहएवाव्यक्तत्वम् । नन्वेवमुपांशुयाजस्योत्पत्तिवाक्ये देवताश्रवणाभावात् अव्यक्तता स्यात् । ततश्च तत्प्रकृतिकः सोमः स्यादिति । उच्यते । मन्त्रव-

णात्तत्र देवतायास्तादर्थ्यावगमान्न दोष इति ।

८अ० १पा० १०-११अधि०

सत्रात्मकाहर्गणेषु सत्रात्मकद्वादशाहस्य, [अहीनात्मकाहर्गणेषु] अहीनात्मकद्वादशाह[स्य च]ातिदेशः ॥ संवत्सरादिषु गवामयनस्य ॥

८ अ० १ पा० १४ अधि०

अत्रेदं चिन्त्यते—सौर्यादौ दर्शपूर्णमासधर्माणां प्रवृत्तावपि गोदोहनं न प्रवर्तते । तस्य पुरुषार्थत्वात् । यद्धि क्रत्वर्थं तदेवातिदेशेन प्रवर्तते । अथातिदेशान्मास्तु प्रवृत्तिः, प्रकृतिवदाश्रयलाभादेव प्रवृत्तिरस्तु । नेति ब्रूमः । दर्शपूर्णमासापूर्वसाधनीभूतप्रणयनस्यैवाश्रयत्वात्तस्य च विकृतावलाभात् ॥ यद्धि क्रत्वर्थं पुरुषार्थं च तस्य विकृतौ भवति प्रवृत्तिः । यथा—'खादिरं वीर्यकामाय यूपं कुर्यात्' इत्यत्र खादिरे प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तते, खादिरेण हि स सिध्यति । स चास्ति । तस्मात्कामं साधयिष्यति—इति भाष्यकृतः । वार्तिककारास्तु—खादिरप्रवृत्तावपि कामो न प्रवर्तते । यद्धि क्रत्वर्थं तत्प्रवर्तते । न च फलं क्रत्वर्थम् । वीर्यकामो हि यदि खादिरार्थः स्यात्तथा खादिरे प्रवर्तमाने तदङ्गत्वात्सोऽपि प्रवर्तते । इह तु विपरीतं तादर्थ्यं खादिर एव वीर्यकामार्थः । एवं तर्हि खादिरः पुरुषार्थत्वाद्विकृतौ न प्रवर्तेत इति चेत् सत्यम् । येनांशेन क्रत्वर्थस्तेनैव प्रवर्तते न पुरुषार्थत्वांशेनेत्यदोषात् ।

एवं यत्र यत्सामान्यं तत्र तस्यविध्यन्तः । सामान्याच्छब्दसादृश्यम् । एवं च क्वचित्सामान्यं क्वचिद्देवतासामान्यं क्वचिद्व्यक्तत्वसामान्यं क्वचिद्गुणसामान्यं क्वचिदन्य सौर्यादावाग्नेयस्य निर्वपत्यादिशब्दसामान्यात् । (?)

८अ० २पा० २अधि०

सवनीयनिरूढादिषु प्राणिद्रव्यकत्वसादृश्यविशेषादग्नीषोमीयस्य विध्यन्तः । यथा वाग्नीषोमीये पशौ हविस्सामान्यात्सान्नाय्यप्रवृत्तिः । सान्नाय्यं हि पशुतः प्रभवति । पशुरपि पशुप्रभवः । सान्नाय्यपात्रं चोखा पशौ दृश्यमाना तत्प्रकृतिकत्वं सूचयति ।

८ अ० ३ पा० १ अधि०

'आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सारस्वतं चरुं बार्हस्पत्यं

